निर्मानो निरहंकृतिः शमसुखाभोगैकबद्धस्पृहः ॥ २८९ ॥

भिक्षाहारमदैन्यमप्रतिसुखं भीतिच्छिदं सर्वदा
दुर्मात्सर्यमदाभिमानमथनं दुःखौघविध्वंसनम् ।
सर्वत्रान्वहमप्रयत्नसुलभं साधुप्रियं पावनं
शंभोः सत्रमवार्यमक्षयनिधिं शंसन्ति योगीश्वराः ॥ २९० ॥

भूः पर्यङ्को निजभुजलता कन्दुकं खं वितानं
दीपश्चन्द्रः सुमतिवनितालब्धसङ्गप्रमोदः ।
दिक्कान्ताभिः पवनचमरैर्वीज्यमानः समन्ताद्
भिक्षुः शेते नृप इव भुवि त्यक्तसर्वस्पृहोऽपि ॥ २९१ ॥

-विजीर्ण- (for -विशीर्ण-). D -वस्त्र-; F2.3.5 J G2.3 -चीर-; H -कीर्ण- (for -जीर्ण-). F2 J Y1.4–6.8 T1.2 G1–4 M2.4.5 -वसनः; H -वसन-; T3 -वसनं. C संस्यूत-; D संप्रार्थ-; H -प्रान्तोत्थ- (for संप्राप्त-). B2t.v. C F2.3.4t.v. कंथाधरो; F4 H3t कंथासखे; F5 कंथाधनो; J X Y (Y7 missing) T G M -कंथासनो (for -कन्थासखो). — d) F2 निर्मायो; M3 निर्मानी (for निर्मानो). J8 निरहंकृतः. C शमसुधा-; F2 समसुखो; Eot J Y3 M3 शमसुखो; F4 समसुखा-; Y3 शमसुखे. F2 M3 -योगैकबद्धस्पृहः; X भोगैकदत्त°; G1 M1.2.4.5 भोगैकलब्ध°; G2t -भोगैरबद्ध°.

BIS. 4585 (2045) Bhartṛ. ed. Bohl. 3. 95. Haeb. 90. Galan. 89; SSD. 4. f. 26a.

290 { V } Om. generally in N. Found in S [Also ISM Kaḷamkar195 V29; Punjab 2885 V29; NS3 V27]. — a) W अप्रतिहतं. W X1 भीतिच्छदं; G1 M1–3 तापच्छिदं. Y6.8 T M4.5 सर्वतो (for सर्वदा). — b) X2 दुर्मोच्छर्य-. Y4.5.7 °दमनं; G1 M1.2 °शमनं (for °मथनं). G1 M1.2 दुःखेषु (for दुःखौघ-). Y7 -विध्वंसिनं; Y8 G1 M1.2.5 -विध्वंसकं. — c) Y3 सर्वत्र क्रमता प्रयत्न.° X भावनं (for पावनं).

BIS. 4586 (2046) Bhartṛ. ed. Bohl. 3. 31. Haeb and Galan 27. lith. ed. I. 28. Śatakāv. 98; SRB p. 370. 101; SRK. p. 78. 7 (Bh.).

291 { V } A paraphrase of महाशय्या शय्या. Found in W (V86); also F3.5 V75; BVB2 V73 [Also Jodhpur1 V69; BU V80.] — a) BVB2 भूमिः शय्या (for भूः पर्यङ्को). F3 गल्लकं; F5 गेंडुकः; BVB2 गंडुकं (for कन्दुकं). — b) F5 विरति- (for सुमति-) F5 -संगलब्धप्रबोधः; W2.4 -लब्धसंगः प्रमोदः. — c) F3.5 BVB2 दिक्कन्याभिः and वीज्यमानोनुकूलं. — d) BVB2 सुखं (for भुवि). F3 BVB2 त्यक्तसर्वैषणोपि.

BIS. 4601 (2054) Bhartṛ. ed. Bohl. 3. 93. Haeb. 16. lith. ed. I. 89, III. 87. Galan 90. Subhāsh. 146; Śp. 4097; SRB. p. 369. 60; SHV. f. 76a. 855 (Bh.); SS. 36. 9; SU. 1008; SM. 905; SSD. 4. f. 25b; SSV. 886.

भोगा भङ्गुरवृत्तयो बहुविधास् तैरेव चायं भवस्
तत् कस्यैव कृते परिभ्रमत रे लोकाः कृतं चेष्टितैः ।
आशापाशशतोपशान्तिविशदं चेतः समाधीयतां
कामोच्छित्तिवशे स्वधामनि यदि श्रद्धेयमस्मद्वचः ॥ २९२ ॥

भोगास् तुङ्गतरङ्गभङ्गचपलाः प्राणाः क्षणध्वंसिनः
स्तोकान्येव दिनानि यौवनसुखं प्रीतिः प्रियेष्वस्थिरा ।

292 {V} Om. in F1 NS1.2, and BU114/7. — [a]) F2 बहुविधैस्; W2t.3t [ऽ]पि बहुधा (for बहुविधास्). B2 lacuna from चायं up to शतोप in third pāda. W3 -विधस्; X G2.3 भवो; Y4–6 भ्रमस्; M4 हतस्; M5 हितः. — In M5, the whole second pāda is missing and third pāda is given twice. — [b]) B1 C D F5 H I J2.3 W1t X Y1.2.3 T G4.5 तत्कस्येह; E5 J1 M1 तत्कस्येव; F2 सकस्येह; F3 तस्यैवेह; W1c.2.3c.4c तत्कस्यै ह; W3t तत्कस्मै हि; Y4–6 तत्तस्यैव; G2.3 यत्तत्कस्य; G1 M2 चकस्येव (for तत् कस्यैव). F2 परिभ्रमलते; W1.2.3c X Y1.2 G2–4 परिभ्रमत हे; W3t परिमज हे; G1 परिभ्रमतदे; M1 परिभ्रमथरे; M2 परिभ्रमतदे; M4 वरभ्रततरो (for परिभ्रमत रे). F2 T3 M4 लोकः; F3 J1 लोका; Y7 G1 M2.3 लोकैः. B1 सुखं तिष्ठत; W1–3 X Y7 G1.3.4t.v. M2.3 कृतं चेष्टितं. — [c]) Y7 -हतोप-. J °शांतविश(J1 °ष)दं; W3 शांतिविषदं; Y7 M4.5 (second time) °शांतिविवशं; M5 (first time) शांतिविवरं. Y1 समाधीयते. — [d]) A कामोच्छित्तिविधौ; C तापोच्छित्तिवशे; D F3 Ic J W4t Y2 (orig.).5.6 G1.3 M1.2.4 कामोत्पत्तिवशे; F2 कामापत्तिवशे; F5 Y1 M5 कामोत्पत्तिवशं; W1.2.3t.4c G4 काम्योत्पत्तिवशे; W3c कामोत्पत्तिवशी; X काम्योत्पत्तिविश-; Y2 (by corr.).3 G2 कामोत्पत्स्यवशे (Y3 °श-); Y4.7.8 T G5 कामोत्पत्तिवशात्; M3 गम्योत्पत्ति * *. F3 स्वधाम्नि च यदि; X स्वधामनियतं. G4 अस्मद्वशः. B काप्यात्यंतिकसौख्यधामनि यदि श्रद्धेयमस्मद्वचः.

BIS. 4632 (2071) Bhartṛ. ed. Bohl. 3. 40. Haeb. and Galan 36. lith. ed. I. 37, II. 90; SRK. p. 93. 8 (Bh.); SSD. 4. f. 18a.

293 {V} Om. in A E (but E5 V115, extra), BORI 326, NS1.3, BU114/7, and Harilal's lith. ed. Benares 1860. — [a]) B C -चंचलतराः; F4 -लोलचपल-; J1 -भंगचपल-; Y1.3–8 T G M -भंग(G4 om. hapl. भंग)तरलाः. B1 Y8 क्षिणध्वंसिनः; W4 क्षणं ध्वंसिनः. — [b]) D °सुखा प्रीतिः; F4 °मुखं प्रीतिः; J G5 °सुखप्रीतिः; W Y4–8 T G1 M °सुखस्फूर्तिः; X1 °सुखं मिथ्यं; X2 °सुखां मित्थं; G4 °सुखं सूक्ति- (for °सुखं प्रीतिः). F1 प्रियेव स्थिरा; F4 मते सुस्थिरा; J G5 प्रियेषु स्थिता. (J1 °ताः); Y1.3.6.7 T G4 M1.5 प्रियासु स्थिता (M5 °रा); W (W1 doubtful) क्रियासु स्थिता (W4 °ताः); X प्रियासु स्थितं; Y4.5 सुखा सुस्थिता; Y8 प्रिया नस्थिरा; G1 तथा सुस्थिता; G2.3 स्थिता वस्तुषु; M2 तथा सुस्थिता; M3 प्रियाव स्थिरा; M4 प्रियास्वस्थिरा (for प्रियेष्वस्थिरा). [The original reading may have been प्रिये अस्थिरा]. — C subst. the second half of 198* for [cd]. — [c]) D एवममलं; F4.5 G1 M1–4 एवमखिलं; Y3 एतदखिलं. H1t.2.3t मत्वा; J1 W1.2.4 बुद्धा; X2 Y4 बुद्धया (for बुद्ध्वा). D E5 M1.5 बुधान्; G4 बुधैर्; M2 बुधो. B F4 H यौवने; D E5 F1–3 I J Y8 G2.3 M1 बोधये; F5 बोधने; Y7 G1.4 M2 बोधको; G5 बोधितो; M3 जंतवो (for बोधका). — [d]) X2 लोकानिग्रह-; Y3 कालानुग्रह-. Y3 वरसा (sic) (for मनसा).

तत् संसारमसारमेव निखिलं बुद्ध्वा बुधा बोधका
लोकानुग्रहपेशलेन मनसा यत्नः समाधीयताम् ॥ २९३ ॥

भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद् भयं
माने दैन्यभयं बले रिपुभयं रूपे जराया भयम् ।
शास्त्रे वादिभयं गुणे खलभयं काये कृतान्ताद् भयं
सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयम् ॥ २९४ ॥

भो मर्त्याः शृणुत स्फुटाक्षरमिदं वाक्यं शिवप्राप्तये
सन्तः क्रीडनमिन्द्रियैः सुखलवप्राप्त्यर्थमभ्युद्यताः ।
संसारे क्षणभङ्गभङ्गुरतरे लभ्यं न चात्यन्तिकं
स्वात्मन्यस्ति समाधिनिर्मितसुखं यत् तत् स्वयं चिन्त्यताम् ॥२९५॥

मत्तेभकुम्भदलने भुवि सन्ति शूराः
केचित् प्रचण्डमृगराजवधेऽपि दक्षाः ।

BIS. 4634 (2073) Bhartṛ. ed. Bohl. 3. 35. Haeb. and Galan 31. lith. ed. I and III. 32. Subhāsh. 317; SRB. p. 373. 185; SRK. p. 93. 4 (Bh.); SK. 6. 439, 7. 7; SSD. 4. f. 17b.

294 {V} Cf. the variant śloka in Group III. Om. generally in N. Found in D (var.) J1; F4 V124 (23, var.). [Also GVS 2387 V104 (var.); BORI 326 V96 (95); ISM Kaḷamkar 195 V122 (125); BORI 328 V148 (40); Wai 2 V105?; Punjab 2885 V30; Ujjain 6414 V106 (107, var.).] — [a]) X सुखेऽसुख°; G2t कुले च्युत° (for कुले च्युति°). G5 [ऽ]पलापाद् (for नृपालाद्). — [b]) W तरुण्या (for जराया). — [c]) Y7 बल°; T8 कल° (for खल°). W2 कार्ये; Y1.4 काले (for काये). — [d]) Y8 खलु (for भुवि).

BIS. 4637 (2075) Bhartṛ. ed. Bohl. 3. 32. Haeb and Galan 28. lith. ed. I and III. 29, II. 101. Subhash. 88. Kāvyakal. 3. Aṣṭaratna 5 (Haeb. p. 8); SRB. p. 370. 90; SRK. p. 92. 1 (Bh.); SA. 38. 35 (var.). Kṣemendra claims this śloka (var.) as his own in Aucityavicāracarcā (KM. 1, p. 130) and Caturvargasaṃgraha 4. 7 (KM. 5, p. 98).

295 {V} Found in ACD F4 (V100=99) [Also BORI 329 and Punjab 2101, V75; BORI 328 V102 (100); Punjab 697 V93) — [a]) A8 शिवप्रीतये; C D Punjab 2885 शिवावाप्तये. — [b]) C क्रीडितुम् (for क्रीडनम्). A8 °लवप्राप्तये °सम्-; C °लवावाप्त्यर्थम्. — [c]) F4 -भंगुरतरं. C चात्यंतिकं (for चात्यन्तिकं). — [d]) C स्वात्मन्यस्त-. C F4 -निर्मल- (for -निर्मित-). C चेतः समा-; D ये तत्समा-; F4 यत्नः स्वयं (for यत् तत् स्वयं).

296 {Ś} Om. in A. — [a]) B1 E0 I सूराः; D Y4 T धीराः; Y1A वीराः (for शूराः). — [b]) After के, Y2 lost on missing folio. G1 मृगजाति-. E2t °विधे; F1.2 °जये (for °वधे). D M5 विदग्धाः. (for ऽपि दक्षाः). — [c]) G1 नु (for तु). J प्रसंह्य. — [d]) G4 -मदने (for -दलने). F3 ऽ विरला; Y7 विरता.

किंतु ब्रवीमि बलिनां पुरतः प्रसह्य
कन्दर्पदर्पदलने विरला मनुष्याः ॥ २९६ ॥

मत्तेभकुम्भपरिणाहिनि कुङ्कुमार्द्रे
कान्तापयोधरतटे रतिखेदखिन्नः ।
वक्षो निधाय भुजपञ्जरमध्यवर्ती
धन्यः क्षपां क्षपयति क्षणलब्धनिद्रः ॥ २९७ ॥

मधु तिष्ठति वाचि योषितां हृदि हालाहलमेव केवलम् ।
अत एव निपीयतेऽधरो हृदयं मुष्टिभिरेव ताड्यते ॥ २९८ ॥

महादेवो देवः सरिदपि च सैवामरसरिद्
गुहा एवागारं वसनमपि ता एव हरितः ।

BIS. 4662 (2091) Bhartṛ. ed. Bohl. **1**. 58. Haeb. 61. Subhāsh. 76; **Sabhyāaṁkaraṇa** of Govindajit f. 21a (Bh.); SM. 1381; SN. 252; SSV. 1366; **JSV. 134**. 6; SLP. **4**. 57 (Bh.).

297 {Ś} Found in A C E, F4 (Ś 18), H I [**Also** GVS 2387 **and BVB2** Ś18, BORI 326 Ś17; BORI 329 Ś101 (102); Punjab 2101 **V extra 1**; **ISM** Kalamkar 195 Ś17; BU Ś20; Wai2 Ś17; NS1 Ś23; NS3 Ś18]. — a) It -परिहारिणि. Eo. 1. 4. 5 कुंकुमार्द्रे. — b) It रतरवेद्°. — c) A Ec पिधाय (for निधाय). H °मंडल° (for °पञ्जर°). — d) A Eo. 1. 4. 5 (by corr.) H10 (orig) 2. 3 क्षिपां; E1 क्षणं. Eo. 1. 3c. 4. 5 क्षिपयति.

BIS. 4663 (2092) Bhartṛ. in Schiefner and Weber p. 22. Paño. ed. Koseg. I. 224. ed. Om. 213; Śp. 3693 (Bh.), and 3951; SRB. p. 319. 27 (Bh.); SBH. 1292; Kavīndravacanasamuccaya 245; SU. 704 (Bh.); SLP. **3**. 77.

298 {Ś} Om. generally in **N**. Found in **S** [Also Punjab 2885 Ś61 (55)) T1 and some Telugu MSS. transpose this to Ś60, though the general position is Ś51. — a) W2-4 योषितो. — b) Y1 हालाहालम्; Y3 हलाहलम्; M2 हालहल (for हालाहलम्). — c) Y1 M4 ऽधरं (for ऽधरो). — d) W3 हृदये.

BIS. 4677 (2097) Bhartṛ. ed. Bohl. **1**. 82. Haeb. 85. Paño. ed. orn. 151. ed. Bomb. 189. Hit. ed. Schl. 65. 8. Subhāsh. 17; SBH. 3380 (Kālidāsa + Māgha); Śṛṅgārabindu; Kuvalayānanda; Saundarananda of Aśvaghoṣa 8. 35cd = मधु तिष्ठति वाचि योषितां हृदये हालहलं महद्विषम् (reference per Mr. P. M. Lad); VS. 615 (var., Vikramāditya + Kālidāsa); SMV. **17**. 4; SLP. **3**. 64.

299 {V} Found in A C E F1 (V43) F4 V48 [Also BORI 329 V105; **Punjab 2101 V extra 2. 3**; BORI 328 V49; Jodhpur 3 V49; NS1 V52; NS2 V40 (38); NS3 V112 (extra).] — a) C महादेहो. E4 सैवासुरसरिद्. — b) C सैवागारं; F4 (m.v. as in text) एवासारं. E5t सरितः (for हरितः). — c) Ao. 1. 3 कापोयं. E3. 5 जरैन्मं Ao. 1. 3 इयत् (for इदं). — d) F4 वक्ष्यामो वा (by transp.). A वनविटपिनः सन्तु; E3. 4 नदविटप एवास्तु. A दयिताः; C F1. 4 दयितः.

सुहृद् वा कालोऽयं व्रतमिदमदैन्यव्रतमिदं
किय‍द् वा वक्ष्यामो वटविटप एवास्तु दयिता ॥ २९९ ॥

महेश्वरे वा जगतां महेश्वरे जनार्दने वा जगदन्तरात्मनि ।
न भेदहेतुप्रतिपत्तिरस्ति मे तथापि भक्तिस् तरुणेन्दुशेखरे ॥ ३०० ॥

मातर्मेदिनि तात मारुत सखे तेजः सुबन्धो जल
भ्रातर्व्योम निबद्ध एष भवतामन्त्यः प्रणामाञ्जलिः ।
युष्मत्सङ्गवशोपजातसुकृतोद्रेकस्फुरन्निर्मल-
ज्ञानापास्तसमस्तमोहमहिमा लीये परब्रह्मणि ॥ ३०१ ॥

मातर्लक्ष्मि भजस्व कंचिदपरं मत्काङ्क्षिणी मा स्म भूर्
भोगेभ्यः स्पृहयालवस् तव वशे का निःस्पृहाणामसि ।

BIS. 4758 (4702) Bhartṛ. lith. ed. II. 3. 44. Subhāsh. 320.

300 {V} Om. in $F_{1.2}$ X $M_{4.5}$ Mysore 582 (subst. अहौ वा हारे वा) Jodhpur 3 NS1 and Ujjain 6414. Y_7 missing. — [a]) A_3 C E_{2t} $F_{3.5}$ J W $Y_{1-6.8}$ T G_{2-5} अधीश्वरे (for the second महेश्वरे). $G_{1.4tv.}$ M_{1-3} पिनाकिनि प्राणभृतां प्रणायके. — [c]) A_3 अभेदबुद्धि-; B $J_{2.3}$ $Y_{1-6.8}$ $W_{1c.2c.3c}$ T G M_{1-3} न वस्तुभेद-; C न चास्ति भेद-; $E_{0.4}$ m.v. °नो भेदहेतुः; $E_{2t.3.4t}$ $F_{3.5}$ तयोर्न भेद-; E_5 $H_{1.3}$ न भेदहेतुः; J_{1t} समस्तु भेद-; J_{10} समस्तभेद-; W_{1-3} (all text) न वस्तुतो मे; W_4 नमस्तुतो मे. J_1 प्रतिपत्तिनास्ति; G_{2t} प्रतिपत्तिरस्तु. B_1 रे (for मे). W om. मे. — [d]) B_1 स्तिथापि (corrupt); $J_{1.2}$ तदापि (for तथापि). M_{1-3} विभावस् (for [अ]पि भक्तिस्). Y_{1-3} G_{1-4} भावस् (for भक्तिस्).

BIS. 4775 (2159) Bhartṛ. ed. Bohl. 3. 84. Haeb. 79. lith. ed. I. 82, II. 89 Prasaṅgābh. 9. Com. on Kāvyādarśa of Daṇḍin 1. 73; SHV. f. 28a (Bh.).

301 {V} Om. in A W, BORI 329 and NS2. Punjab 2101 V extra 2. 8. Y_7 missing. — [a]) B C_{1c} H J_1 $F_{3.5}$ -ज्योतिः (for तेजः). D च बंधो; Y_3 सुबंधौ. $E_{0.2.4}$ ज्वलः; F_4 जलं; J_1 T_2 ज्वल; G_5 -ज्वलं. — [b]) F_2 J_1 Y_5 T_1 G_{3-5} एव (for एष). $B_{2t.v.}$ I मार्गे; C F_5 अग्रे; $E_{0.3-5}$ $J_{1.3}$ अंत्य-; F_2 अंतः; F_3 मान्यः; X_1 आंत्य-; X_2 आंते; T_2 मर्त्यः; $G_{2.3}$ अंत्ये; M_3 अद्य (for अन्त्यः). E_{3c} $F_{1.3.5}$ M_3 प्रमाणांजलिः; $G_{2.3}$ भवत्यंजलिः. — [c]) F_3 °वशेन जात°; X °वशोपि जात°. X $Y_{1-6.8}$ T $G_{1.4.5}$ M °सुकृत(X_1 °ते; X_2 °तो)स्फार-. J_3 X -निर्मलः. — [d]) C -ज्वालापास्त-; D F_2 -ज्ञानोपास्त-; X -ज्ञानोपास्त-. H_3 लीयं. B D E_3 $F_{1.4.5}$ H I Y_2 परे (for पर-).

BIS. 4786 (2163) Bhartṛ. ed. Bohl. 3. 96. Haeb. 91. Galan 92. lith. ed. II. 80. Kāvyakal. 35. Prasaṅgābh. 7. Śāntiś. 4. 25 (Haeb. 429); Śp. 4095 (Bh.); SRB. p. 369. 75 (Bh.); SRH. 201, 3 (Bh.); SRK. p. 296. 16 (BIS.); SSD. 4. f. 29a.

302 {V} Om. in W. Y_7 missing. — [a]) G_1 M_2 लक्ष्मीरम्ब (for मातर्लक्ष्मि). E_3 J_{10} लक्ष्मी. B_1 D I J_3 M_4 किंचिदपरं; Y_1 $T_{2.3}$ कं चिदपरं. B_2 E_{3t} Y_2 -कांक्षणी; C -प्रार्थिनी. J च (for स्म). — [b]) F_2 $Y_{1-6.8}$ T $G_{4.5}$ $M_{4.5}$ भोगेषु; F_5 भोगिभ्यः. B [अ]थ विनिर्वृता वयमहो; C D E F_4 (m.v. as in text) स्पृहयालवो न हि वयं; $Y_{1.4.5}$ G_{2-4}

सद्यःस्यूतपलाशपत्रपुटिकापात्रे पवित्रीकृते

भिक्षासक्तुभिरेव संप्रति वयं वृत्तिं समीहामहे ॥ ३०२ ॥

माने म्लायिनि खण्डिते च वसुनि व्यर्थं प्रयातेऽर्थिनि

क्षीणे बन्धुजने गते परिजने नष्टे शनैर्यौवने ।

युक्तं केवलमेतदेव सुधियां यज् जह्नुकन्यापयः-

पूतग्रावगिरीन्द्रकन्दरदरीकुञ्जे निवासः क्वचित् ॥ ३०३ ॥

मृत्पिण्डो जलरेखया वलयितः सर्वोऽप्ययं नन्वणु

अंशीकृत्य स एव संयुगशतै राज्ञां गणैर्भुज्यते ।

स्पृहयालवस्तव वशाः. G_4 के (for का). $E_{3.5}$ $F_{1.2.5}$ M निस्पृहाणाम्. F_3 Y_1 $G_{4.5}$ अपि (for असि). — [c]) B J_1t सद्यः सूत-; D F_4 Y_2 G_4 सद्यश्च्युत-; J_3 सत्यं मति; T_2 सत्यः स्यूत-; G_2t यद्यः स्यूत-. J_1t T_3 -फलाश-. Y_2 -पात्र- (for -पत्र-). A B $F_{3.5}$ -पुटके; J_3 -घटिका-; T_2 -पुटका- (for -पुटिका-). F_4 1 -पत्रे-; T_2 -पात्रैः; M_4 -पत्री-. $Y_{2-6.8}$ T $G_{2.4.5}$ M -कृतैर्. — [d]) $A_{2.3}$ C E_3 °शक्तुभिर्; J_1t शक्तिभिर्; $Y_{4.6.8}$ T (T_1c.v. as in text) G_5 °वस्तुभिर् (for °सक्तुभिर्). Y_3 समीहाम ये; M_4 समीक्षामहे.

BIS. 4787 (2164) Bhartṛ. lith. ed. I. 3. 102, II. 60. Galan 88. Schiefner and Weber p. 24. Kāvyakal. 33. Nītisamk. 85. Subhāsh. 312. Śāntiś. 4. 11 (Haeb. 427); SRB. p. 370. 102; SRK, p. 87. 11 (Bh.); SSD. 4. f. 29a.

303 {V} Om. in W and GVS 2387 (Probably missing folio in original). — [a]) A_3 F_2 माने म्लायति; X_2 म्लाने मानिनि. F_2 वसुमति (for च वसुनि). C E_0 J $Y_{1.2.4-8}$ T G M व्यथं; F_2 व्यर्थ- (for व्यर्थं). C om.; G_1 प्रयासे (for प्रयाते). — [b]) B_3 परजने; Y_3 सखिजने (for परिजने). B F_1 याते; X भ्रष्टे (for नष्टे). E_2 X_2 शनिर्; G_3t पुनर्. — [c]) A_3 युक्ते (for युक्तं). F_2 सुधियो; Y_1 (printed text) सुधिया; Y_7 G_4 विदुषां. $J_{1.3}$ या जह्नु° — [d]) D $F_{1.3}$ -पूतग्राम-; J_3 पुत्रग्राव-; $M_{4.5}$ -पूरे वाथ (for -पूतग्राव-). Y_3 -करींद्र- (for -गिरीन्द्र-). $M_{4.5}$ -मंदर- (for -कन्दर-). Y_1 -कुटी-; $Y_{2.4-8}$ T G_1 M -तटी-; G_4 -नटी- (for -दरी-). $F_{3.5}$ -कुंजेषु वासः; X -कुक्षौ निवासः.

BIS. 4825 (2183) Bhartṛ. ed. Bohl. 3. 79. Haeb. 101; Galan 72. lith. ed. II. 31. Prasaṅgābh. 10. Subhāsh. 312; Śp, 4178 (Bh.); SRB. p. 376. 254 (Bh.); SK 7. 114; SU. 1053; SSD. 4. f. 28a; JSV. 304. 3.

304 {V} Om. in W, Jodhpur1, NS2, GVS 2387 (probably missing folio in original) and BVB. 5. — [a]) $F_{2.3.5}$ (m.v. as in text) $H_1t_{.2.3}$ परिवृ (H_3t °ब्र)तः. A B_2 D E_5 F H I $J_{2.3}$ Y T $G_{1-3.5}$ $M_{1-3.5}$ नन्वणुः; B_1 $E_{0.2-4}$ न त्वणुः; J_1t नन्वनु; X_1 निर्गुणः; X_2 दुर्गुणः; G_4 नश्वरः; M_4 नन्वणून् (for नन्वणु found only in C F_2). — [b]) A F_{3-5} $G_{1.2}t$ तं स्वीकृत्य; B E_5 F_4m. v. H G_3 $M_{1-3.5}$ स्वंशीकृत्य; C X $Y_{4-6.8}$ T_1 $G_{4.5}$ स्वांशीकृत्य; D It Y_3 G_3c भागीकृत्य; E_0t स्वंसीकृत्य; $E_0c_{.2}$ अंगीकृत्य; $E_{3.4}$ स्वं स्वीकृत्य; F_1 तत्स्वीकृत्य; F_2 ये स्वीकृत्य; $Y_{1.7}$ $T_{2.3}$ येंशीकृत्य; Y_2 स्वेकीकृत्य; M_4 स्वंगीकृत्य; (for अंशीकृत्य found in only Hc Ic J [I com. ननु निश्चितं अणु स्वं अंशीकृत्य विभागीकृत्य]). B C $F_{2.3}$ J Y T G $M_{1-3.5}$ तमेव; F_1 समं स; F_5 स एष; M_4 तदेव (for स एव). Y_{3-8} T_1 G_2 संगर- (for संयुग-). C F_5 J Y T G M गणा; H शतैर्; $F_{2.3}$ गुणा (for गणैर्). C

ते दद्युर्ददतेऽथ वा किमपि न क्षुद्रा दरिद्रा भृशं
धिग् धिक् तान् पुरुषाधमान् धनकणान् वाञ्छन्ति तेभ्योऽपि ये ॥

यथातुरः पथ्यमरोचमानं जिजीविषुर्भेषजमाददीत ।
तथा यियासुर्भुवि लोकयात्रां भुञ्जीत भोगानविषक्तचित्तः ॥ ३०५ ॥

यदा मेरुः श्रीमान् निपतति युगान्ताग्निनिहतः
समुद्राः शुष्यन्ति प्रचुरमकरग्राहनिलयाः ।
धरा गच्छत्यन्तं धरणिधरपादैरपि धृता
शरीरे का वार्ता करिकलभकर्णाग्रचपले ॥ ३०६ ॥

यदि नाम दैवगत्या जगदसरोजं कदाचिदपि जातम् ।

$F_{2.3.5}$ J S (W om.) भुंजते. — [c]) C दद्युस्ते; $F_{3.4}$ m.v.$_5$ $Y_{1.2}$ G_1 M_{1-4} नो दद्युर्. F_{2-4} X $Y_{1A.4-8}$ T (T_{1C}.v. as) in text) G_2 M_5 ददतोथ; Y_{1BC} ददतोपि; Y_3 दयतोथ; M_3 दधतेपि. B D E F_1 H X न किमपि; C $Y_{3.4.7.8}$ T G_4 $M_{1.3}$ किमपरं; $F_{2.3}$ I J $G_{1.3}$ $M_{2.4.5}$ किमपि तत्; F_4 किमपि त्वं; F_5 Y_1 किमपि ते; Y_2 कियदहो; $Y_{5.6}$ $G_{2.5}$ कियदपि (for किमपि न). C भ्रमाद् (for भृशं). — [d]) A C D $F_{1.4}$ -लवं; E H X -कणं; G_3t -गणान् (for -कणान्). A तेभ्योपि वांछंति (by transp.). G_1 $M_{1.2}$ हि (for ऽपि).

BIS. 4952 (2245) Bhartṛ. ed. Bohl. 3. 60. Haeb. 96. lith. ed. I. 91, II. 25. Śatakav. 110. Subhāsh. 310; SRB. p. 80. 40; SSV. 1276.

305 { Ś } Found in B C F, $F_{1.2}$ (Ś39); F_4 (Ś44) [Also GVS 2387 Ś44; BORI 329 Ś96 (97); Punjab 2101 Ś97 (98); Jodhpur1 Ś41 (40); Jodhpur3 Ś40; NS1 Ś48; NS2 Ś40]. — [b]) C आदधाति; E_3t आददानः; F_4 आददाति. — [c]) B C धिया सुभुवि; F_4 विधासुभुवि. C F_4 लोकपात्रं. — [d]) E_2 अविषिक्त-; E_3 नविषक्त-; F_4 अविमुक्तः B C F_4 -चेताः.

BIS. 5108 (2310) Bhartṛ. lith. ed. II. 1. 44. Schiefner and Weber p. 22; SLP. 4. 87 (Bh.).

306 { V } Om. in W, BORI 326. F_2 Y_7 order *acbd*. — [a]) E_5t सदा; X Y T G $M_{1.2}$ यतो; J_3 यथा. A_1t युगांगाग्नि-. C -विहितः; E_{3C} It -निहितः; $F_{2.3.4}$m.v. I_C J X $Y_{1-3.7}$ G M -दलितः; $Y_{4-6.8}$ T -वलितः (for -निहतः). — [b]) F_3 क्षुभ्यंति; X शुष्यंते (for शुष्यन्ति). E -मिकर-; F_2 -सलिला; X_1 -नकर- (for -मकर-). Y_7 -व्यूह- (for -ग्राह-). C G_3t.v.$_5$ -कलिलाः; J_1 -सलिलं; $J_{2.3}$ Y_7 -सलिलाः; Y_3 -विलयाः; $G_{2.3}$ -कलिताः (for -निलयाः). — [c]) Y_8 धना (for धरा). B गच्छत्यस्तं; X_2 G_5 गच्छत्यंते; Y_1 गच्छत्यंतर्; $Y_{6.8}$ गच्छेत्यंतं. B °संघैर् (for °पादैर्). E_3 धृताः; $J_{1.2}$ भृता; J_3 धृतः; M_3 धृतं. — [d]) X_2 किरिकलभ-; Y_{10} करिकरभ-. C -कर्णांत-; M_4 -कंठाग्र-. F_1 -चटुले (for -चपले).

BIS. 5197 (2355) Bhartṛ. lith. ed. II. 3. 64. Galan 75. Schiefner and Weber p. 24. Subhāsh. 313; SRH. 197. 34 (Bh.); SK. 7. 31; SSD. 4. f. 17a.

307 { N } Found in B C E F_4 (N106) H I Y_8 (N21) [Also GVS 2387 N109; BVB2 N102 (101); BORI 329 N 97 (92); Punjab 2101 N113 (114); BU N 105 (103); Jodhpur1 N105 (106); Jodhpur3 N105 (107); NS1 N112 (115); NS2

अवकरनिकरं विकिरति तत् किं कृकवाकुरिव हंसः ॥ ३०७ ॥

यदेतत् स्वाच्छन्द्यं विहरणमकार्पण्यमशनं
सहार्यैः संवासः श्रुतमुपशमैकव्रतफलम् ।
मनो मन्दस्पन्दं बहिरतिचिरस्यापि विमृशन्
न जाने कस्यैषा परिणतिरुदारस्य तपसः ॥ ३०८ ॥

यद् यस्य नाभिरुचितं न तत्र तस्य स्पृहा मनोज्ञेऽपि ।
रमणीयेऽपि सुधांशौ न नाम कामः सरोजिन्याः ॥ ३०९ ॥

यन् नागा मदवारिभिन्नकरटास् तिष्ठन्ति निद्रालसा
द्वारे स्वर्णविभूषिताश् च तुरगा वल्गन्ति यद् दर्पिताः ।

N101]. — [b]) Y_3 कदापि संजातं. E_3t संजातं (for जातम्). — [c]) C अविकारं (for अवकरनिकरं). B_1 $E_{0-2,5}$ Y_3 विकरति. — [d]) F_4 Y_3 कृतवाकुरिव.

BIS. 5220. (2363) Bhartṛ. ed. Bohl. extra 21. Haeb. 2. 107. Śatakāv. 93; Śp. 811; SRB. p. 221. 9 (Bhaṭṭavāsudeva); SBH. 691 (Bhaṭṭavāsudeva); SRK. p. 184. 11 (Rasikajīvana); SSD. 2. f. 17b.

308 {V} Om. in W, Jodhpur 1, NS2 and BVB 5. Missing in Y_7, Mysore 582. — [a]) J_3 यवाहं. $F_{1,2}$ J S (W om. X_2 lacuna; Y_7 missing); स्वच्छंदं. A विरमणम्; X_2 विरहणम्. Y_3 अपायस्य (for अकार्पण्यम्). H_3t अशमं; Y_3 G_2t शमनं (for अशनं). — [b]) B_2 C E_0c $F_{2,3}$ $Y_{1,2}$ $M_{1,3-5}$ सहायैः; E_3t G_4 सहाय्यैः; E_3c साहाय्यैः (E com. परिकरेण सह); F_1 सहार्षैं; X साहाय्ये; G_1 सहाय्यः; M_2 सहायः (for सहार्यैः). X चारण्ये; M_5 संवादः (for संवासः). F_3 J_1t T_3 °समैक-; F_4 °शमैर् (for °शमैक-). C -प्रतिफलं; F_1 -वृतफलं. — [c]) E_4 F_6 मंदस्फंदं; F_2 मंदं मंदं; I [ऽ]मंदस्पंदं. B C E F_{2-5} H I J X Y (Y_7 missing) T G_{2-5} $M_{1,3-5}$ अपि (for अति- found only in A G_1 M_2) D विषरति; F_1 बहिरिति. A B_2 चरस्यापि; D विमृश्याथ; F_2 विमृश्यन्न-; Y_3 च कस्यापि (for चिरस्यापि). D सुचिरं; F_2 -विरतं (for विमृशन्). J_3 चिरःसाधितमृशन् (corrupt). — [d]) J_3 परिणतम्.

BIS. 5256 (4821) Bhartṛ. lith. ed. II. 3. 51. Schiefner and Weber p. 24; SRB. p. 368. 46.

309 {Ś} Om. in A C D I X Y, BVB2, BORI 326, Ujjain 6414 and NS3. — [a]) F_3 यद्यस्ति. B नातिरुचितं; F_3 W नास्ति रुचिरं; F_5 J नातिरुचिरं. — [b]) न तस्य तत्र. F_2 corrupt; F_3 स्पृहया (for स्पृहा). W तत्रास्य स्पृहाम(Wst न)भोग्येपि ($W_{1,2c,3c,4c}$ मनोज्ञेपि). — [c]) F_4 अतिरुचिरेपि सुधांशौ. — [d]) F_5 W न मनःकामः-सरोजिन्याः; H नलिनी नानुरागमाधत्ते.

BIS. 5288 (2291) Bhartṛ. ed. Bohl. 1. 103; SLP. 5. 39 (Bh.).

310 {N} Found in B D, E_3 (N60 (59), not collated); F_5 N52; and H [Also BORI 329 N 59 (54); Punjab 2101 (N55 = 56); BU N55 (53); Jodhpur1 N 59; NS1 N55 (56); NS2 N55; NS3 N59]. — [a]) B_2 मदभिन्नगल्लकरटास्. — [b]) B F_5 हेम- (for स्वर्ण-). F_5 -विमूर्छिताश्च (for -विभूषि°). B_2 हेषंति (for वल्गन्ति). — [c]) B -निनदैः (for -पणवैः). B_2 F_5 सुसस्तु. — [d]) H -सिद्धि- (for -ऋद्धि-).

वीणावेणुमृदङ्गशङ्खपणवैः सुतस् च यद् बोध्यते
तत् सर्वं सुरलोकऋद्धिसदृशं धर्मस्य विस्फूर्जितम् ॥ ३१० ॥

यां चिन्तयामि सततं मयि सा विरक्ता
साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः ।
अस्मत्कृते च परितुष्यति काचिदन्या
धिक् तां च तं च मदनं च इमां च मां च ॥ ३११ ॥

यूयं वयं वयं यूयमित्यासीन् मतिरावयोः ।
किं जातमधुना येन यूयं यूयं वयं वयम् ॥ ३१२ ॥

येनैवाम्बरखण्डेन संवीतो निशि चन्द्रमाः ।
तेनैव च दिवा भानुरहो दौर्गत्यमेतयोः ॥ ३१३ ॥

BIS. 5302 (2399) Bhartṛ. ed. Bohl. **3.** 73. Haeb. **2.** 56. Subhāsh. 54; Śp. 681; SHV. f. 60a. 601; SS. **10.** 17; SSD. **2.** f. 119b; JSV. **32.** 3.

311 { N, V } Found generally in **N**, but om. in Wai 2. Ao fol. missing. Om. in **S** (but N2 in W and Y1). F1 V3; F3 N1, V105; F4 V1; Jodhpur3 V1, N1; BORI 326 N2, V101 (100). -- a) C [अ]नुदिनं (for सततं). F1.3 (Vai) H1.2.3c न रक्ता (for विरक्ता). — b) F3 (Niti).5 H1.2.3c सा चान्यम्. C नरं; Y1 जनः (for जनं). C स नरो; Y1B स्वजनो (for स जनो). — c) F3 (Vai) तत्कारणाच्च (for अस्मत्कृते च). A3 Y1B तु; B2 (by corr.) F2 H1.2.3c I [ऽ]पि (for च). Eo.1 F3 (Vai) परिशुष्यति; Fi.4m.v. परिखिद्यति. — d) A3 B1 मदनं धिगिमां च मां च; C मदनं च कुसुमेषुमिमां च मां च; F2 मदनं च हि मां त्विमां च.

BIS. 5438 (2461) Bhartṛ. ed. Bohl. lith. ed. II and Galan **2.** 2. **Haeb.** and lith. ed. I. 1. Vet. in LA (III) 25. Siṁhāsanadvā. (after Gildemeister). Subhāsh. 302. ŚKDr. under विरक्ता; VS. 566 (Bh.); SU. 1005 (Bh.); SL. f. 18a; com. of Siṁhadevagaṇi on Vāgbhaṭālaṁkāra **1.** 17 (KM. 48. p. 13).

312 { V } Found generally in **N**. Om. in B F2 J W X Y. NS3 V114 (extra). — a) H1t यूयं यूयं. — b) Est.4t प्रीतिर् (for मतिर्). — c) E3 किमभूद्; F5 किं यातम् (for किं जातम्). F3 [अ]प्येतत् (for येन).

BIS. 2498. Bhartṛ. ed. Bohl. p. XI. lith. ed. II. **3.** 61. Schiefner and Weber p. 24. Subhāsh. 173; SRH. **200.** 17 (Bh.); SS. **42.** 22.

313 { V, N } Om. in BU 114/7, W T1 (but interpolated in T1B), NS2 and Adyar XXII-B-10. Y8 *Prakṣiptaḥ.* — b) F2 सचिता; F5 संचितो; Y3 सेवितो; Y1 संस्थितो; G4 संवृतो (for संवीतो). — c) X2 दिवसे (for च दिवा). — d) H पश्य (Hc अहो also). D दौर्भाग्यम्; Y2 दौर्गमम्; G5 दारिद्र्यम्. F2 एनयोः; X2 एवयोः.

BIS. 5544 (2510) Bhartṛ. lith. ed. II. **3.** 15. Schiefner and Weber p. 23; SRB. p. 65. 5; SM. 1312; SSD. **2.** f. 4a.

ये संतोषसुखप्रमोदमुदितास् तेषां न भिन्ना मुदो
　ये त्वन्ये धनलुब्धसंकुलधियस् तेषां न तृष्णा हृता ।
इत्थं कस्य कृते कृतः स विधिना तादृक् पदं संपदां
　स्वात्मन्येव समाप्तहेममहिमा मेरुर्न मे रोचते ॥ ३१४ ॥

रम्यं हर्म्यतलं न किं वसतये श्रव्यं न गेयादिकं
　किं वा प्राणसमासमागमसुखं नैवाधिकप्रीतये ।
किं तूद्भ्रान्तपतत्पतंगपवनव्यालोलदीपाङ्कुर-
　च्छायाचञ्चलमाकलय्य सततं सन्तो वनान्तं गताः ॥ ३१५ ॥

---

314 { N, V } Om. in W, and Harilal lith. ed. Punjab 2885 V 28; NS3 N21, V26; ISM Kaḷamkar 195 N18 (19), V28. — [a]) Y T G1.4.5 M -निरंतरप्र-; F1 -सुखप्रबुद्ध- (for -सुखप्रमोद-). J1.3 -मुदिता. A3 येषां (for तेषां). D भिन्नो मदो; F2 J भिन्ना मुदा. — [b]) F1.4 [ऽ]प्यन्ये; F3 चान्ये (for त्वन्ये). A F1.2 -लोभ-; Eo -लब्ध-; It -लब्धि- (for -लुब्ध-). Y3 -कातर- (for -संकुल-). B1 कृष्णा. A2.3 Eo.1.2.5 H1 हृताः; B C E3 H3 F2–4 I J1c.2.3 T3 G2.3 हृता (I °ताः); J1t स्पृहा (for हृता). — [c]) In many N *Mss.* इत्थं looks like इच्छं. J1 अप्येकस्य (for इत्थं कस्य). Eo तस्य; F4 m.v. यस्य (for कस्य). J2.3 G3t कृतं (for कृतः). J2 Y2 तु; J3 च; G2t सु- (for स). F4 तादृक्पतिः. Eot स्वापदां. — [d]) Y3 स्वात्मन्येवम्. F2 J1 Y7 G4 समस्त-; F8 समाम-; Y8 अवाप्त- (for समाप्त-).

BIS. 5579 (2526) Bhartṛ. ed. Bohl. 3. 12. Haeb. 2. 19. Śatakāv. 80. Subhāsh. 305; Śp. 1065 (Bh. in some Mss., Vidyāpati in others.); SRB. p. 215. 5 (Lalluputra Vidyādhara); SBH. 1027 (Lallusūnu Vidyādhara); SKM. 36. 14 (Vidyāpati); SRK. p. 196. 2 (Śp.); SM. 1203; SSD. 2. f. 53bs SSV. 1188.

315 { V } Om. in B, Jodhpur1, BORI 326, Śṛngeri 309, BVB5 and Harilal' lith. ed. Ujjain 6414 V64 (60), 65 (61). — [a]) J3 वसति वे. D lacuna; E5 F2–4 J W Y1–6 G M श्राव्यं (for श्रव्यं). M2 गेयादि किं. — [b]) G3 नैवा (for किं वा). D E3.4 I G3t प्राणसमं (for °समा-). W3 -समागमसुखे; Y1Bt M1.4.5 -गमागमसुखं; Y2 (m.v. as in text) -गमागतसुखं; Y4 -गमोत्सवसुखं; T3 -समागमसुतं. C D E3.4 F2–5 H W X Y1–3 G1.3.4 M नैवाधिकं; J3 Y7 नैवाधिकः. F3 प्राप्तये; X1.2 (orig.) प्रीयते (for -प्रीतये). — [c]) D F5 J3t.3 W Y3–8 T G1.3c.5 M1.2.4.5 तु; F2.3 I G2t तद्-; Y2 भ्रू-; G3t -चिद्-; G4 जु. (for तूद्-). C S (except M4.5) -पतंगपक्ष- (for -पतत्पतंग). C Y1 G5 -व्याधूत- (for -व्यालोल-). C दीपानलच्छ-; Y7 -नीपांकुरच्छ-. — [d]) G1 M1.2 -ज्वाला (for -छाया). C Eo.2.5 F H J (J3 by corr.) S (except W Y7) सकलं; D वदनं (for सततं). X गताः.

BIS. 5714 (2589) Bhartṛ. ed. Bohl. 3. 81. Haeb. 76. lith. ed. I. 79, III. 77. Galan 74. Kāvyakal. 26 Nītisaṁk. 67; Śp. 4114 (Bh.); SRB. 373. 181; SBH. 3326; SKM. 131. 51 (Vijñānātman); SDK. 5. 65. 2 (p. 320, Vijñānātman); SRH. 197. 36½ (Bh.); Śāntiśataka 2. 14.

रात्रिः सैव पुनः स एव दिवसो मत्वाबुधा जन्तवो
धावन्त्युद्यमिनस् तथैव निभृतप्रारब्धतत्तत्क्रियाः ।
व्यापारैः पुनरुक्तभुक्तविषयैरेवंविधेनामुना
संसारेण कदर्थिताः कथमहो मोहान् न लज्जामहे ॥ ३१६ ॥

रे कन्दर्प करं कदर्थयसि किं कोदण्डटङ्कारवै
रे रे कोकिल कोमलैः कलरवैः किं त्वं वृथा जल्पसि ।
मुग्धे स्निग्धविदग्धमुग्धमधुरैर्लोलैः कटाक्षैरलं
चेतश् चुम्बितचन्द्रचूडचरणध्यानामृतं वर्तते ॥ ३१७ ॥

---

316 {V} Om. in BORI 329, Punjab 2101 and NS2. — a) B1 सेव; H3 सेव्य (for सैव). Y7 स एष; Y8 प्रसभ (for स एव). Ao.1c.2.3 B C D F2.3.5 W1-3 X2 Y2.6-8 T1.2 G1 M मत्वा मुधा; E मत्वा बुधा; (E com. बुधाः = पण्डिताः); F1 यत्रासते. F4t.v. Ic W4 X1 Y1.3 T3 G4 मत्वा मुदा; J Y4.5 G2.3.5 मत्वा सदा. — b) Y1 [उ]द्यमितास; Y3 त एव (for तथैव). E3 G1 निभृताः; F2 निवृत-; F5 J2t.3 Y2.3 निभृतं; M2 निभृता (for निभृत-). Y5 G2.st.v. -प्रारंभ- (for -प्रारब्ध-). D -तत्तत्प्रियाः; X -तंतुक्रियाः; G1 M2 -दत्तक्रियाः. — c) Ao-2 Y3 -भुक्तविरसैर्; C -दोषविषमैर्; I मुक्तविषयैर्; W X Y1.2.4-8 T G1.4.5 M -भूतविषयैर्; G3 -पक्षविषयैर्. C F3 J S इत्थं- (for एवं-). F4 (m.v. as in text) बुधेनामुना. — d) S वयम(Y3 °मि)हो (for कथमहो). J1t W Y7 मोहं न; M4 मोहो न. Wt Y3 M1 जानीमहे (for लज्जामहे).

BIS. 5778 (2626) Bhartṛ. ed. Bohl. 3. 45. Haeb. and Galan 41. lith. ed. I. 33, II. 71, III. 42; SRB. p. 375. 227; SSD. 4. f. 8b.

317 {V, Ś} Om. in A F1, Punjab 2101, BORI 329, ISM Kaḷamkar 195 and NS1. NS3 V95, Ś109 (110). — a) B C F2.3.5 J S किं (for रे). F3 X2 Y2.4.5 G2.3 कथं; J2 कळं; J3 दळं; X1 Y1.6.8 T G5 शरं; G1.4 M1.2.4.5 वृथा (for करं). B C F2.3.5 J X Y T G2.3.5 रे; G1.4 M1.2.4.5 मां; M3 ते (for किं). B1 °टंकारिते; B2 F5 X Y1AC.2.4.5 M1.4.5 °टंकारितैः; C °टांकारितैः; F2 Y1B °डंकारितैः; F3 W °झंकारितैः; F4 टंकारकैः; J2.3 Y6.7 T G4 °टंकारितं; Y3 °कंकारितं; Y8 °टंकांकितं; G1 M2 °झंकारवैः; G2.3 °ठंकारितैः; G5 °टंकारवं; M3 °झंकारितं. — b) M3 ते रे (for रे रे). B C F2.3.5 I J S (except W4) कोमलं. B C F2.3.5 Ic J W1-3 Y1.2.4-8 T G M कलरवं; It कलिरवं; Y3 कलकलं. B2 किंचिद्; I X Y T G किं वा J2.3 किं तु (for किं त्वं). B मा कृथाः; C F2.3.5 H I J2 वल्गसि; D J3 W वल्गसे; G4 M3 जल्पसे. — c) Ic दुग्ध-; W1.4 मुग्धा-; W2.3 मुग्ध- (for मुग्धे). X Y1.6-8 T G4 -चारु-; G1 M4.5 -नर्म-; M2 -निर्म- (for -मुग्ध-). D F3 H -मधुराक्षेपैः; Ec F4 -मधुरक्षेपैः; F2 -मधुराक्षोभैः; M3 -हरिणीतुल्यैः; M4 -मधुरालोकैः; M5 -मधुरालोलैः (for -मधुरैर्लोलैः). W लोलैकपक्षैर् (for °लोलैः कटाक्षैर्). — d) C G1 M1.2.4.5 संप्रति; Eot.st.3 (orig.) F3 H Ic J1 W X2 M3 चुंबति; X1 चुंबत (for चुम्बित-). I -ध्याने धृतं; W -ध्यानामृते. C सेवते; F2 सांप्रतं; H संप्रति; G1 M1.2.4.5 चुम्बति.

BIS. 5799 (2640) Bhartṛ. ed. Bohl. and lith. ed. III. 1. 97. Haeb. 100. lith. ed. II. 101. Śatakāv. 75; Śp. 4096 (Bh.); SRB. p. 369. 74 (Bh.); SK. 7. SSD. 4. f. 28b.

लज्जां गुणौघजननीं जननीमिवार्याम्
अत्यन्तशुद्धहृदया अनुवर्तमानाः।
तेजस्विनः सुखमसूनपि संत्यजन्ति
सत्यव्रतव्यसनिनो न पुनः प्रतिज्ञाम् ॥ ३१८ ॥

लभेत सिकतासु तैलमपि यत्नतः पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः।
कदाचिदपि पर्यटञ् शशविषाणमासादयेन्
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ ३१९ ॥

वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह।
न मूर्खजनसंपर्कः सुरेन्द्रभवनेष्वपि ॥ ३२० ॥

---

318 {N} Om. in T1.2, ISM Kalamkar 195, Telugu ed. 1848, Mysore KB 340, and Adyar XXV-L-2. Extra in W. — [a]) Ao D E F1.4.5 J2.3 W1.2 लज्जा; G5 वर्जां (sic.). B1 गुणप्र- (for गुणौघ-). D F1.2 -जननी; M5 -जननीर् (for -जननीं). A3 C D E1.3.5 F5 I J W1.2.4 X Y G4 इव स्वाम्; B1 इवस्काम्; F1 M5 इवार्या; W3 इवस्याम् (for इवार्याम्). — [b]) A F3-5 H1t W Y2 -हृदयाम(Ao.1 °न)नुवर्तमानां; B Eo. 1.2c.3.5 F1.2 H2.3 I J1 Y3-8 T3 G M °हृदयामनुवर्तमानाः; C -हृदयामनुभूयमानाः; D -हृदयो ह्यनुवर्तमानां; E2t °हृदयाः परिवर्तमानाः; J2.3 -हृदितामनुवर्तमानाः (for हृदया अनु° found only in X Y1). — [c]) Y1A (orig.) सुखमसूनि च; Y1B (orig.) सुखमसूनिव. G4 हि त्यजंति. — [d]) B1 सत्यव्रतं; F1 सत्यव्रते. J2.3 घनः प्रतिज्ञां; W3 पुनस्त्यजंति; G1 परप्रतिज्ञां; G5 पुनः प्रतीक्षां; M3-5 पुनःप्रतिज्ञाः.

BIS. 5824 (2655) Bhartṛ. ed. Bohl. 2. 100. Haeb. 99, lith. ed. I. 108, II. 110. Subhāsh. 316; SRB. p. 50. 196; SRK. p. 240. 95. (Bh.); SSD. 2. f. 99a.

319 {N} Om. in A and BU. E3 folio missing. — [a]) E5m.v. F2 W2.st.4 (also as in text) X1 Y2 लभेच्च. F5 तैलमिति. F4 पीडनात्. — [b]) Y7 लभेच्च (for पिबेच्च). H1.3 -जलमयं; G1 -सु जलं; G2.4 M1.3.5 -स्वपि जलं (for -सु सलिलं). — [c]) Eo.2t Y2 शशि- (for शश-). — [d]) X संबोधयेत्; Y4 आराधये; Y7 आकारयेत्.

BIS. 5837 (2661) Bhartṛ. ed. Bohl. lith. ed. II and Galan 2. 5. Haeb. 3. lith. ed. I. 4; Śp. 415 (Bh.); SRB. p. 41. 57 (Bh.); SBH. 447 (Bh.); SRH. 29. 35 (Bh.); SRK. p. 34. 3 (Bh.); Sāhityamīmāṁsā 7 (first pāda only, p. 129); SSD. 2. f. 131b.

320 {N} Found in B D E F3.5 W [Also many uncollated N *Mss*]. — [c]) D F5 नो; Eo-2.5 मा (for न). D -संसर्गो; Eo.3.5 F3 -संसर्गः; E2 -संसर्गा. — [d]) D [ऽ]सुरेंद्र-; W4 सुरेश-. D Eo.1t.3.5 F5 W3.4 °भुवनेष्वपि.

BIS. 4975 (2246) Bhartṛ. ed. Bohl. 2. 11. Haeb. 62. lith. ed. I. 13, II. 14. Galan 7. Saṁskṛtapāṭhopa. 62. Galan (var.) 235. Subhāsh. 118, 188; SRB. p. 39. 5; SRK. p. 35. 11 (Bh.); SA. 7. 29; PT. 6. 25; SSD. 2. f. 143b; SSV. 667.

वरं प्राणच्छेदः समदमघवन्मुक्तकुलिश-
  प्रहारैरुद्गच्छद्बहुलदहनोद्गारगुरुभिः ।
तुषाराद्रेः सूनोरह ह पितरि क्लेशविवशे
  न चासौ संपातः पयसि पयसां पत्युरुचितः ॥ ३२१ ॥

वरं शृङ्गोत्तुङ्गाद् गुरुशिखरिणः क्वापि विषमे
  पतित्वायं कायः कठिनदृषदन्तर्विदलितः ।
वरं न्यस्तो हस्तः फणिपतिमुखे तीक्ष्णदशने
  वरं वह्नौ पातस् तदपि न कृतः शीलविलयः ॥ ३२२ ॥

वर्णं सितं झटिति वीक्ष्य शिरोरुहाणां
  स्थानं परं परिभवस्य तदेव पुंसाम् ।

---

321 { N } Om. in Y_2, BORI 329, Ujjain 6414 and NS2. — [a]) J_3 Y_{4-8} $T_{2.3}$ G_{3-5} $M_{1.2}$ प्राणत्यागः; W X Y_1 पक्षच्छेदः; T_1 M_{3-5} प्राणोच्छेदः (for प्राणच्छेदः). D Y_7 समर- (for समद-). A_3 -मघवन्मुक्ति-; $M_{1-3.5}$ -मघवोन्मुक्त-. M_2 -कुशिल- (for -कुलिश-). — [b]) J_1 G_2 M_4 उद्गच्छन्; G_4 उद्गच्छन्निर्. B D $E_{0.1.3.5}$ F_2 I W_4 X $Y_{1.4-8}$ $T_{1.2}$m.v.$_3$ $G_{1.5}$ M_2 -बहुल-; C E_2 $F_{4.5}$ H W_{1-3} Y_3 G_4 $M_{1.3-5}$ -बहल-; F_3 -वदन-; J_1 दहन-; T_3 -गरल- (for -बहुल-). D $F_{2.3}$ X Y_1 -रुधिरोद्गार-; J_3 -दहनोदार- T_2 (m.v. as in text) गहनोद्गार-; G_1 M_{2-4} -दहनोद्गारि- (M_3 °गारि-). Y_8 -हतिभिः; G_1 M_{1-3} -रुचिभिः. — [c]) J_3 -तुषाराद्रिः; Wc तुहिनाद्रेः. J_2 सानोर् (for सूनोर्). F_1 lacuna; J_1t.$_2$ वडवाशेष-; J_1c.$_3$ वडवाश्लेष- (for पितरि क्लेश-). — [d]) F_3 संवासः; Y_1At संयंता (for संपातः). F_5 W_3t भर्तुर् (for पत्युर्). W_4 यत्पुरचितः.

BIS. 5972 (2744) Bhartr̥. ed. Bohl. **2**. 29. Haeb. 58. lith. ed. I and II. 36. Galan 39; SRB. p. 215. 11; SSD. **2**. f. 54a.

322 { N } Om. in W. — [a]) A_{0-2} शृंगे तुंगे; A_3 शृंगे वासो; C $J_{2.3}$ Y_2 $G_{2.3}$c शृंगात्तुंगाद्; E_0 I Y_8 शृंगोत्तंगाद्; $F_{1.2.4}$ X $Y_{1.7}$ $T_{1.2}$ $G_{1.3}$t.$_{4.5}$ M_{1-3} शृंगोत्संगाद्. $E_{0-2.5}$ वर-; X $Y_{1.4-8}$ G_{1-4} M हिम- (for गुरु-). F_4 -शिखरिणां (for °रिणः). D $F_{1.2}$ $J_{2.3}$ $Y_{1.2}$ G_4 विषये. — [b]) $J_{2.3}$ पतत्वायं; $G_{1.2}$ M_{1-3} पतित्वाथः. J_2 -द्रुमवंते; $T_{1.2}$ G_5 -दृषदंते (for -दृषदन्तर्-). B_2 $F_{3.5}$ I J Y_7 $T_{1.2}$ G_{2-5} °विगलितः; M_3 -निदलितः; M_5 -विलिखितः. — [c]) F_2 न्यस्तो हस्ते; F_3 हस्तो न्यस्तः (by transp.). $A_{0.1}$ B_2 E_0 फणपति-; A_2 फणमति-. — [d]) C कुतः; F_2 कृता; $Y_{4.5}$ G_2t वरः; T_3 ततः (for कृतः). F_2 शीलस्वविषयः; T_3 $M_{4.5}$ शीलविषमः.

BIS. 5954 (2731) Bhartr̥. ed. Bohl. **2**. 77. Haeb. 86; SSV. 1343; JS. 375.

323 { V, N } Om. in B C E (but E_3 Vextra 6; E_4 V115 [114, extra]) F_5 H I $M_{4.5}$ and Mysore 582. F_1 V107; F_2 N52, V107; $F_{3.4}$ N52; BORI 327 and Punjab 2101 V99; BORI 328 V139 (132); RASB G7747 V111 (114); Punjab 2885 V73 (74); Ujjain 6414 N51; NS2 V90 (89). — [a]) D F_2 (Nīti).$_4$ X श्वेतं पदं; E_4 Y_8 वर्णं शितं; F_4t.v. आरोहणं; Y_6 वर्णान्वितं. D F_4m.v. X Y_1 शिरसि; F_2 (Nīti).$_4$ समभि-; J_2 रुदति; J_3 Y_7 T_3 झडिति; $Y_{2.3}$ झटति; $Y_{4.6}$ $G_{2.3}$ जगति; W G_1 om.

आरोपितास्थिशकलं परिहृत्य यान्ति
चण्डालकूपमिव दूरतरं तरुण्यः ॥ ३२३ ॥

वह्निस् तस्य जलायते जलनिधिः कुल्यायते तत्क्षणान्
मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरङ्गायते ।
व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते
यस्याङ्गेऽखिललोकवल्लभतमं शीलं समुन्मीलति ॥ ३२४ ॥

वितीर्णे सर्वस्वे तरुणकरुणापूर्णहृदयाः
स्मरन्तः संसारे विगुणपरिणामा विधिगतीः ।

(for झटिति). F_4t.v. शुक्र- (for वीक्ष्य). E_4 सरोरुहाणां. — [b]) W Y T G_{1-4} M_{1-3} जरा- (for परं). $Y_{1.4-8}$ T $G_{1.5}$ M_3 तदा पुमांसं; Y_3 $G_{2.8}$ $M_{1.2}$ तथैव पुंसां; G_4 तथा पुमांसं — [c]) G_6 °ताड- (for °तास्थि-). E_3 J_1 -सकलं; W (except W_4t) -कलशं; Y_{4-8} T (T_1c.v. as in text) M_3 -शतकं. — [d]) E_4 $F_{3.4}$ $W_{1.2}$ X $Y_{1.2}$ चांडाल-. J_2 Y_7 -रूपम् (for -कूपम्). D दूलतरं.

BIS. 6599 (3059) Bhartṛ. ed. Bohl. 3. 75. Haeb. 72. lith. ed. I. 74. Galan 86. Pañc. ed. Koseg. III. 193. ed. Bomb. IV. 77. Śatakāv. 106. Subhāsh. 318; Śp. 4146. (Bh.); SRB. p. 95. 14; SRK. p. 97. 6 (Bh.); SA. 38. 68; SSD. 4. f. 11b.

324* {N} Extra in W. om. in Adyar XXVIII-M-56. — [b]) H_2 W_8 °सिखायते; J_2 °तिलायते. C मृगरिपुः. — [c]) T_8 स्वल्पमृगायते (for माल्यगुणायते). D F_8 Y_8 विषधरः; M_5 विषरसं. C °पूरायते; F_4 °वर्यायते; W °चर्यायते (for °वर्षायते). — [d]) J_1 यस्मिन्वा; J_3 यस्मान्वा (for यस्याङ्गे). W_1 Y_8 खलु (for ऽखिल-). C °रतं; F_5m.v. °हरिर्; J_1 °मतं; X Y_{1A} G_4 -मिदं; $Y_{1BC.2.5.6.8}$ $T_{1.2}$ G_5 °तरं (for °तमं). It T_8 M_8 शीलं समुज्जृंभते; F_5m.v. हृद्येव विस्फूर्जति; Y_7 शीलं समुन्मीलितं. F_4t.v. दुर्दावं नगरायतेस्ति सुकृतं यस्याविकीर्णं महत्.

BIS. 6014 (2765) Bhartṛ. ed. Bohl. 2. 78. Haeb. 87. lith. ed. I. 107, II. 109. Galan 102. Prasangābh. 4; SRB. p. 84. 19; SRK. p. 102. 4 (Kalpataru); SK. 6. 513; SM. 1350 (Bh.); SSD. 2. f. 117a; SSV. 1332 (Bh.).

325 {V} Om. in A, BORI 329, Punjab 2101, Jodhpur 1, and BVB 5. Y_7 missing. — [a]) E_5 F_3 W (except W_4t) विस्तीर्णे; $G_{1.4}$ $M_{4.5}$ विशीर्णे; M_2 दशार्णे (for वितीर्णे). $M_{2.8}$ करुण- (for तरुण-). G_1 $M_{1.2}$ -करुणार्द्रार्द्र-; M_3 -तरुणापूर्ण-. — [b]) W G_1 M_2 सरंतः; T_8 सरंतल्- (for स्मरन्तः). C $F_{2.5}$ W G_1 M_2 संसारं. $F_{2.5}$ द्विगुण-; W विरस-; Y_8 त्रिगुण- (for विगुण-). $Y_{1-3.8}$ T G_6 M_{3-5} -परिणामं. B_1 E $F_{1.4}$ I J_2 -वधिगतीः; B_3 D -वधियतिः; C F_6 J_1t $W_{1.2}$c -वधिगतं; F_2 विधिगताः; F_3 W_2t.$_{3.4}$ X G_4 -वधिगतिं; J_1c -वधिमतः; J_3 $Y_{1-3.8}$ T G_5 M_{3-5} विधिगतिं; Y_{4-6} $G_{2.3}$ -वधि वयं; G_1 -वधिरिति; M_2 विधिरिति (for विधिगतीः). — [c]) D W X $Y_{1.3-6}$ G_{1-4} M कदा (for वयं). B_1 C E_5 F J W X Y (Y_7 missing) T G_5 पुण्यारण्ये. B_3 Ic परिणित-; E_0 °परिणिति-; $E_{2-4.5}$t J_1 परिणति-; W $Y_{5.6}$ परिगत-. C F_4m.v. J_2 W Y (Y_7 missing) T G_{2-4} -किरणास् (T_3 °णः); F_5 H X -किरणे; G_1 $M_{1.2.5}$ -वदनास; M_3 -शिशिरार; M_4 -वदनां (for -किरणैस्).

वयं पुण्येऽरण्ये परिणतशरच्चन्द्रकिरणैस्
त्रियामा नेष्यामो हरचरणचित्तैकशरणाः ॥ ३२५ ॥

विरमत बुधा योषित्सङ्गात् सुखात् क्षणभङ्गुरात्
कुरुत करुणामैत्रीप्रज्ञावधूजनसंगमम् ।
न खलु नरके हाराक्रान्तं घनस्तनमण्डलं
शरणमथ वा श्रोणीबिम्बं रणन्मणिमेखलम् ॥ ३२६ ॥

विरम विरमायासादस्माद् दुरध्यवसायतो
विपदि महतां धैर्यध्वंसं यदीक्षितुमीहसे ।
अयि जडविधे कल्पापाये व्यपेतनिजक्रमाः
कुलशिखरिणः क्षुद्रा नैते न वा जलराशयः ॥ ३२७ ॥

E_5 प्रियामा-; $F_{2.3}$ G_4 $M_{4.5}$ त्रियामां. J सेव्यामो; X -न्ये स्यामो (for नेष्यामो). — [d]) $E_{3c.3.4}$ J_3 Y_4 G_1 M_3 हरि- (for हर-). B $Y_{1Bt.ct.3}$ -वित्तैक-; F_4 $J_{1.2}$ $Y_{2.3}$ T_1 G (except G_{3t}) M -चिंतैक-; J_3 चित्येक- (for -चित्तैक-). $F_{2.5}$ -शरणः.

BIS. 6068 (2789) Bhartṛ. ed. Bohl. **3.** 86. Haeb. 81. lith. ed. I. 84, II. 49, III. 82. Galan 80; SK. **7.** 20.

326 { V, Ś } Om. in A W, BORI 329 and Punjab 2101. — [a]) E_{3t} विरमित: E_{3c} T_2 विरमति. B प्रसि-; F_4 (m.v. as in text) सुखं; Y_3 क्षणात्; G_4 सुतात् (for सुखात्). F_4 (m.v. as in text) °भंगुरं. — [b]) D $F_{1.4}$ भजत; G_1 कुरु तत्. F_2 कुरुत; J_3 तरुणा; T_3 करुणं (for करुणा-). C F_2 -प्रज्ञामैत्री-; J_3 -मैत्रप्रज्ञा-. D Y_3 -नव- (for जन-). — [c]) F_2 हाराक्रांतं; F_5 $G_{1.4}$ M_2 भाराक्रांतं; Y_3 T_2 हारक्रांतं; Y_6 दाराक्रांतं. E_5 Y_7 घनं; J_{1t} जघन- (for घन-). — [d]) F_3 भरणम्; J_2 तरुणिम्; J_3 तरुण-; Y_2 चरणम् (for शरणम्). J_3 रमते (for अथ वा). E_{0t} F_5 X_3 G_1 श्रेणी- (for श्रोणी-). $J_{1c.2.3}$ G_4 क्वणन्; Y_3 स्फुरन् (for रणन्). $T_{2.3}$ °मेघलं.

BIS. 6173 (2833) Bhartṛ. lith. ed. II. **3.** 58. Schiefner and Weber p. **24**; SBH. 3385; JSV. **304.** 16.

327 { N } Om. in C W Y_2 G_4 $M_{4.5}$, Mysore 582, BORI 329, Punjab 2885 and Ujjain 6414. — [a]) B D E $F_{1.2}$ $H_{1.2.3t}$ I Y_3 $G_{2.3}$ विरसा- (for विरमा-). A [अ]मुष्माच्चूनं (for [आ]यासादस्माद्). F_3 दुरवध्याव- X दुराध्यव-; Y_2 दुर्व्यव- (for दुरध्यव-). — [b]) F_5 कर्तुं च समीहसे; $J_{2.3}$ यदि क्षितिमी°; M_2 समीक्ष्य न लज्जसे. — [c]) D $E_{0t.1.2.5}$ F $Y_{1.6}$ अपि (for अयि). B_1 I X Y_1 G_3 जडविधेः; D J Y_7 जडमते; F_1 जडनिधेः; F_2 हतविधेः; F_4 जलनिधेः. $E_{0.1.5}$ कल्याणाय (for कल्पापाये). B_1 व्यत्येत-; F_4 व्यपैति; J_2 व्यवसित-; Y_3 निरस्त-; T_1 $G_{1.3.5}$ M_3 [ऽ]प्यपेत- (for व्यपेत-). E_{3t} I_t °पराक्रमाः; F_2 °निजालयाः; F_4 °निजक्षमा; J_3 °निजक्रमाः; X °निजक्रमः. — [d]) F_2 क्षुण्णा; J_2 क्षुद्राम् (for क्षुद्रा).

BIS. 6148 Bhartṛ. ed. Bohl. extra 17 (order *bacd*). Haeb. **2.** 75.

विरहेऽपि संगमः खलु परस्परं संगतं मनो येषाम् ।
हृदयमपि विघटितं संगमेऽपि विरहं विशेषयति ॥ ३२८ ॥

विवेकव्याकोशे विकसति शमे शाम्यति तृषा
परिष्वङ्गे तुङ्गे प्रसरतितरां सा परिणतिः ।
जराजीर्णैश्वर्यग्रसनगहनाक्षेपकृपणः
कृपापात्रं यस्यां भवति मरुतामप्यधिपतिः ॥ ३२९ ॥

विश्वामित्रपराशरप्रभृतयो वाताम्बुपर्णाशनास्
तेऽपि स्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः ।

---

328 {Ś} Om. in W, Mysore 582, Adyar XXII-B-10, and Śṛngerī 309. — a) B2 D E1 (by corr.) F H1t. 2. 3 X Y1-5. 7 J2 G3. 4 विरहोपि. D संगमाः; E3 M5 संगमं. M3 विरहिणः प्रहिणोति संगमं खलु. — b) F2 J2t Y3 G1 परस्पर-; M3 पर- (for परस्परं). F5 न संगतं; M3 -संगत- (for -संगतं). E2t. 5t F5 Y7 G1 M3 मनो न येषां. — c) A हृदये विघटिते; B2 हृदयेथ विघटिते; C D E2t F4 Ic G1 हृदयमति विघटि(C °ट्टि)तं; E3. 4 अपि हृदयं विघटि(E3c °ट्टि)तं; F1 हृदयमनु विघट्टित-; F5 हृदयमपि चेट्टिघटितं; H अतिविघटितं हि हृदयं; J1 हृदयमघटितं च मे; X Y1 हृदयमसंगतमेषां; Y3-5. 8 T1A. 2. 3 G4 हृदयमपि (Y8 °मधि-)विघटितं चेत्; Y6 T1B हृदयं विघट्टितं चेत्; Y7 हृदयमिति विघटितं; G2 हृदयेपि घटते; G3 हृदयेपि विघटिते; G5 हृदये विघटिते सति; M1 हृदयमपि घट्टितं; M2 हृदयमविघट्टितं; M3 हृदयमपि विघट्टितं; M4. 5 न घटयति येषां हृदयं. — d) A3 B2 C D F4. 5 J1 X1 Y2 G2. 3 संगमोपि; E0t संगम-; E0c X2 संगमो; E2t संगतेपि; E5 सत्संगं; J2 मे संगमे; Y1. 4-6. 8 T G5 संगो; Y3 संगात्; G4 तत्संगो; M1 तत्संगाद्; M2 तत्संगे; M3 संगमे; M4. 5 संगे (for संगमेऽपि). J2 Y3 विरहो. C T3 विशेषयते; X1 विशेषयंति; M3 विशेषतः.

BIS. 6177 (5019) Bhartṛ. lith. ed. II. 1. 80; SLP. 5. 16 (Bh.).

329 {V} Found in ADE, F1 (V19) F4 (V18) [Also GVS 2387 V21; BORI 329, Punjab 2101 and Jodhpur 3 V18; BORI 328 V20; BU V22; NS1 V23; NS2 V15 (14); NS3 V106 (extra). — a) E3. 4 विवेके (for विवेक-). F1 -व्याकोचे. E0. 2. 5 विदधति; E0m.v. विकशति (for विकसति). F1. 4 शनैः (for शमे). — c) D -जीर्णैरंगैर् (for -जीर्णैश्वर्य-). E5t -क्षपणः. — d) F1 महताम्; F4 स महता (for मरुताम्).

SRB. p. 77. 47.

330 {Ś} Found in E2 (Ś109=111, extra); F3 (Ś2), J; S [Also GVS 2387 Ś2; BORI 326 Ś101; ISM Kaḷamkar 195 Ś103; Punjab 2101 N102 (103); Punjab 2885 Ś81 (75); Ujjain 6414 Ś105; NS3 Ś106 (107, extra)]. Y2 folio missing. — a) E2 W2. 3t. 4 ये चांबु- (for वाताम्बु-). E2 W -पत्राशनास्; J X2 G1 M1. 2 -पर्णाशिनस्. — b) M3. 4 दिव्य- (for तेऽपि). E2 Y3. 7 दृष्ट्वा च; F3 G3 M4 दृष्ट्वा वि-; J G2. 4 M3. 5 दृष्ट्वापि; Y8 दृष्ट्वातु (for दृष्ट्वैव). X1 संमोहिताः. — c) E2 आहारं (for शाल्यन्नं). W2-4 घृतसंयुतं दधिपयो; Y4. 5 सुघृतं पयोदधियुतं; M5 सगुळं पयोदधियुतं. J1 ते भुंजते; J2 Y1BC. 4-6. 8 T G2-5 M1. 2. 5 ये (G2 हे) भुंजते (for भुञ्जन्ति ये). — d) E2 कथमहो; W3 यत भवेत् (for यदि भवेद्). E2 दंभः समालोक्यतां; W Y1 विंध्यस्तरेत्सागरं (W2 °रे).

शाल्यन्नं सघृतं पयोदधियुतं भुञ्जन्ति ये मानवास्
तेषामिन्द्रियनिग्रहो यदि भवेद् विन्ध्यः प्लवेत् सागरे ॥ ३३० ॥

वैराग्यं संश्रयत्येको नीतौ भ्रमति चापरः ।
शृङ्गारे रमते कश्चिद् रुचिभेदः परस्परम् ॥ ३३१ ॥

व्याघ्रीव तिष्ठति जरा परितर्जयन्ती
रोगाश् च शत्रव इव प्रहरन्ति देहम् ।
आयुः परिस्रवति भिन्नघटादिवाम्भो
लोकस् तथाप्यहितमाचरतीति चित्रम् ॥ ३३२ ॥

शय्या शैलशिला गृहं गिरिगुहा वस्त्रं तरूणां त्वचः
सारङ्गाः सुहृदो ननु क्षितिरुहां वृत्तिः फलैः कोमलैः ।

BIS. 6204 (2853) Bhartṛ. ed. Bohl. 1. 65. Haeb. 68. lith. ed. II. 100; SRB. p. 252. 57; SRK. p. 235. 47, p. 278. 7 (Bh.); Prabandhacintāmaṇi 4. 182 (Hemasūri). SHV. app. I. f. 2a; SS. 45. 3 (Hemasūri).

331 {Ś} Om. in C D Y (but Y3. Ś101, order *cbad*) T G M. — a) B1 वैराग्ये संचरंन् के के; F2–5 Ic J W वैराग्ये(F4 °ग्यं) संचरत्येको; Y3 वैराग्ये रमते कश्चित्. — b) Eo–2.5 नीचो; F2 नीतो (for नीतौ). B1 F2–4 J Y3 कश्चन; F5 वापरः (for चापरः). — c) F2 भ्रमते; W1 रसते (for रमते). — d) B1 W भुवि भेदाः; E It दृष्टिभेदः; F2.5 J1 Y3 रुचिभेदाः; F3.4 H Ic J2 रुचिभेदात्.

BIS. 6292 (2903) Bhartṛ. ed. Bohl. 1. 99. lith. ed. II. 103; SLP. 5. 38 (Bh.).

332 {V} Om. or extra in E. Eo V112; E3 V111; E3 V extra 2; E4 V111 (110); E5 V114. Baroda 1781 V111 (109). Om. in NS1.2. — a) Ao–2 C Eo परितर्कयंती; E2 परितर्पयंती; J5 (by corr.) परितर्जनीव. — b) Eo रागाश्च; W2 रोमाश्च. W4 शात्रव. C प्रहरंति गात्रे; Eo प्रविशंति देहं; E5t प्रविशंति देहे; J1 प्रवहंति हवेशं. — c) Ao–2 B1 Eo.2–4 I W1.3.4 परिश्रवति; J1t परिस्रयति; J1c परिस्रवंति; T3 परिश्रवंति. E2 नव्य (for भिन्न-). A2 -घटादि शंभो; C -घटादिवापो; J1 -घटादमंभो; G1 M2-घटादिवांबु. — d) C लोको न चात्म-; F3 लोकस्तथा न; J3 लोकास्तथापि. E1 °पि हितम्; M3 व्यथितम् (for [अ]प्यहितम्). M4 आचरतीव. C कष्टं (for चित्रम्).

BIS. 6323 (2917) Bhartṛ. ed. Bohl. 3. 39. Haeb. and Galan 35. lith. ed. I and III. 36, II. 97. Subhāsh. 317; Śp. 4093 (Bh.); SRB. p. 367. 32 (Bh,); SRK. p. 97, 4 (Bh.); Garuḍamahāpurāṇa 111. 10; SSD. 4. f. 8a; JSV. 266. 11.

333 {V} Found in A B D E, F4 V104 (103); BVB5 V109 (extra). [Also GVS 2387 V89; BORI 329 and Punjab 2101 V87; BORI 328 V106 (154); BU V112 (110); Jodhpur 3 V108 (100); Punjab 697 V96; NS2 V78 (77); NS3 V119 (extra);]. — c) B1 E3–5 निर्झरम् (for नैर्झरम्). F4 उचितैरण्यैव. E रत्यै(E2.4 °त्ये)व. — d) A D मन्यंते; B1 मनेते; B2 मेने ते.

येषां नैश्चरमम्बुपानमुचितं रत्यै च विद्याङ्गना
मन्ये ते परमेश्वराः शिरसि यैर्बद्धो न सेवाञ्जलिः ॥ ३३३ ॥

शिरः शार्वं स्वर्गात् पशुपतिशिरस्तः क्षितिधरं
गिरीन्द्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम्।
अधोधो गङ्गेयं पदमुपगता स्तोकमथ वा
विवेकभ्रष्टानां भवति विनिपातः शतमुखः ॥ ३३४ ॥

संपत्सु महतां चित्तं भवत्युत्पलकोमलम्।
आपत्सु च महाशैलशिलासंघातकर्कशम् ॥ ३३५ ॥

संमोहयन्ति मदयन्ति विडम्बयन्ति
निर्भर्त्सयन्ति रमयन्ति विषादयन्ति।
एताः प्रविश्य सदयं हृदयं नराणां
किं नाम वामनयना न समाचरन्ति ॥ ३३६ ॥

BIS. 6411 (2959) Bhartṛ. lith. ed. II. 3. 87; SRH. 200. 30 (Bh.).

334 { V, N } Om. in I, GVS 2387, BORI 329, Punjab 2101 Jodhpur 1 and BVB5. NS3 V57, N104 (extra)- — a) J1 G2t शिवः. A3 E2.3t.4 सार्वं; F1 प्राशा; F2 सार्थं; J3 शर्वं; M5 शापं (for शार्वं). W1-3 स्वर्गं (for स्वर्गात्). W (W4 orig.) पतति शिरसस्तत्; F2 J1 Y7 G4 पशुपतिशिरस्तत्; M5 पशुपतिपुरस्तः. F2 किंतिभृतं; W3 क्षतिधरं (for क्षितिधरं). — b) B महींद्राद्; E2t F2.3.5 J S महीध्राद् (M4 महाद्रेर्); E1t महींध्राद् (for गिरीन्द्राद्). Ao Eo H1c.2.3t उत्तंगाद्. F5 अवधेश्चापि. B2 जलधीः; E2t.3t.4 जलधिः; W4 जलविधिं. — c) B E2-4 F2.3.5 J S (except X Y1) अधो(W3 Y4-6.8 T1B G1 M1.2.5 °थो) गंगा सेयं (M1.2 -क्षेपं; W4 orig. क्षेपा); C अधोधो गंगावत्; Eo.5 अधोधो गांगेयं C वयमुपगता; Eo (and Ec) पदमुपगतं; Y2 पथमुपगता; Y3 पदमपगता. C नूनमथ वा; Y3.8 G1.5 M5 स्तो(G4 तो)कमधुना; M4 स्तोकमधुरा. — d) X2 विनिवातः. J3 Y7 M3.8 शतमखः.

BIS. 6456 (2982) Bhartṛ. ed. Bohl. and lith. ed. II. 2. 10. lith. ed. I. 9. Galan 12; SRB. p. 41. 59; SRK. p. 35. 7 (Bh.); Alaṁkāraratnākara 496. Alaṁkāravimarśinī. 27. 191; SSD. 2. f. 132b; JSV. 208. 3.

335 { N } Om. in A. — b) B1 Eo.1.20.5 J1 Y1.8 T1.2 G5 भवेदुत्पल°. — c) Y2 विपत्सु; E8 [अ]पि; G2 तु (for च). B1 महाघोल; E3t शिलाशैल-; F1.2 महाशैलं.

BIS. 6876 (3188) Bhartṛ. ed. Bohl. 2. 56. Haeb. 29. lith. ed. I and III. 65, II. 66. Galan 68; Subhāsh. 306; SRB. p. 45. 27; SBH. 200 (Bh.); SRH. 168. 9 (Śṛṅgāra); SRK. p. 18. 73 (Prasaṅgaratnāvalī); SK. 2. 75; PT. 1. 27; SSD. 1. f. 94a; SMV. 28. 14.

336 { V, Ś } Found in F3 V106; H I and W [Also BU V4; NS3 Ś111 (112, extra)].

BIS. 6893 (3194) Bhartṛ. ed. Bohl. and Kāvyas. 1. 21. Haeb. 23. Pañc. ed. Koseg. I. 210. Prabodhacandrodaya 1. 27. Subhāsh. 144; SRB. p. 350. 69; SRK. p. 114. 10 (Bh.); SS 44. 5; SM. 1392; SN. 257; SSV. 1377; JS. 394.

सखे धन्याः केचित् त्रुटितभवबन्धव्यतिकरा
वनान्ते चिन्वन्तो विषमविषयाशीविषगतीः ।
शरच्चन्द्रज्योत्स्ना धवलगगनाभोगसुभगां
नयन्ते ये रात्रिं सुकृतचयचित्तैकशरणाः ॥ ३३७ ॥

स जातः कोऽप्यासीन् मदनरिपुणा मूर्ध्नि धवलं
कपालं यस्योच्चैर्विनिहितमलंकारविधये ।
नृभिः प्राणत्राणप्रवणमतिभिः कैश्चिदधुना
नमद्भिः कः पुंसामयमतुलदर्पज्वरभरः ॥ ३३८ ॥

सत्यामेव त्रिलोकीसरिति हरशिरश्चुम्बिनीविच्छटायां
सद्वृत्तं कल्पयन्त्यां वटविटपिभवैर्वल्कलैः सत्फलैश् च ।
कोऽयं विद्वान् विपत्तिज्वरजनितरुजातीव दुःखासिकानां
वक्त्रं वीक्षेत दुःस्थे यदि हि न बिभृयात् स्वे कुटुम्बेऽनुकम्पाम्॥३३९॥

सहकारकुसुमकेसरनिकरभवामोदमूर्च्छितदिगन्ते ।

---

337 { V } Found in A D E, F_1 V57 ; F_4 (V63 = 62). [Also GVS 2387 V 43; BORI 328 V64 (63); Jodhpur 3 V63; NS1 V66; NS2 V53; NS3 V113 (extra).] — a) Many uncollated Mss. अहो (for सखे). — b) E चित्तांतर् (for चिन्वन्तो). F_1 विषमविषपात्री-; F_4 विषयविषमाशी-. Aoc E F_1 -विषगत।:; D -विषमती:; F_4 -विषगर्ति. Ec.v. विषमविषयाशीर्विगलिता: — c) F_4 (m.v. as in text) शरज्योत्स्ना चन्द्रा. — d). A_3 $E_{3t.4t}$ नयंत्येते. A हरिचरणचित्तैक-; A_{1t} (orig.) हरचरणचित्तैक-: F_1 सुकृतमयमित्रैक ; F_4 सुकृतचरणैक; F_4 m. v. हरचरणमो * * (for सुकृतचयचित्तैक-).

338 { V } Om. in A I W, GVS 2387, Punjab 2101, NS2. — a) $E_{o.2}$ F_4 मात्रः (for जातः). X कोप्यस्मिन्. $E_{2.4}$ -विजयिनो; E_3 -जयिनो; E_5 -रिपुणो; F_2 -परिपूर्णो; J_2 -रिपुबाणा (for -रिपुणा). B_1 मूर्धनि पुरा; F_3 मूर्ध्नि विधृत:. — b) E_{5t} G_{3t} विनिहतवद्र् J_{1t} -हृदये (for -विधये). — c) Eot X_2 °त्राणप्रणव°; Y_7 °त्राणाप्रवण°; H_3 केचिदधुना. — d) X नमद्भीवै:; Y_2 महद्भि: क:; M_3 नमद्भि: किं (for नमद्भिः कः). C को पूटोप्ययम् (for कः पुंसामयम्). Y_7 अमल- (for अतुल-). G_4 (t.v. as in text) -ज्वरमद:.

BIS. 6680 (3106) Bhartṛ. ed. Bohl. 3. 61. Haeb. 99. lith. ed. II. 28; SRB. p. 80. 36.

निर्यातस् त्वरितो व्रजन् निपतितः श्रीखण्डपङ्कद्रवैर्
लिप्तः केरलकामिनीकुचतटात् खञ्जः शनैर्गच्छति ॥ ८२३ ॥

[SUPPLEMENT]

अग्रे डुम्बः करधृतडफः पार्श्वतो भण्डमाला
पृष्ठे वेश्या विलसतितरां कर्तरी धर्मतन्तो ।
इत्थं राजा प्रभवति यदा षिङ्गसंगानुरक्तः
प्रत्यासन्नः प्रलपति गुणी किं विदध्मः क यामः ॥ ८२४ ॥

आमोदैस् ते दिशि दिशि गतैर्दूरमाकृष्यमाणा
साक्षाल् लक्ष्मीं तव मलयज द्रष्टुमभ्यागताः स्मः ।
किं पश्यामस् तव परिसरे नावकाशो द्विजिह्वैर्
व्याप्तोऽस्माकं भवतु भवतां स्वस्ति यामो वयं तु ॥ ८२५ ॥

---

818 NS1 Ś12.— SRB. p. 362. 24; SS. 23. 8; SMV. 8. 19.

819 ISM Gore144 V184. 820 ASP1461 extra4. — SRB. p. 18. 25.

821 Ady XXV-L-2 Ś41.

822 Wai2 extra10. — SRB. p. 225. 129 (begins with अथ); ST. 10. 2; SSD. 2. f. 22a.

823 E3 Ś113 (extra). — [a]) परिमलस्तोयं; F4 Ś107. — [b]) अपि (for इव), and आरब्ध- (for प्रारब्ध-). — [c]) त्वरया (for त्वरितो). — [d]) लिप्ते पिच्छिलकेरलीकुचतटे. — SRB. p. 334. 133; SRK. p. 174. 1 (Śp.); VS. 639; SU. 809 (Akbarī-Kālidāsa); BPS. f. 16b. 93.

824 Q1 f. 12a, extra.

825 Q1 extra3. — BIS. 978 (366). Śp. 998; SRB. p. 237. 52; SDK. 4. 51. 2 (p. 261, Acalasiṃha); SKM. 33. 24. All anthologies [cd]) किं पश्यामः सुभग भवतः क्रीडति क्रोड एव व्यालस्तुभ्यं भवतु कुशलं मुञ्च नः साधु (°ध-) यामः ॥

इलिका भ्रमरीध्यानं ध्यायन्ती भ्रमरी भवेत् ।
वीतरागपदं ध्यायन् वीतरागो भवेद् ध्रुवम् ॥ ८२६ ॥
ऐश्वर्यतिमिरं चक्षुः पश्यतोऽपि न पश्यति ।
पुनर्निर्मलतां याति दरिद्राञ्जनमौषधम् ॥ ८२७ ॥
कुचैलागतभर्तारो शूरो सन्मुखखण्डना ।
दातारो वस्त्रहीनाश् च कुरूपा रूपचिन्तये ॥ ८२८ ॥
को धर्मो भूतदया किं सौख्यमारोग्यता जन्तोः ।
[कः] स्नेहः सद्भावः किं पाण्डित्यं परिच्छेदः ॥ ८२९ ॥
क्षणं रटन्ती रुदती नृत्यन्ती याति विह्वला ।
निःसहत्वं तदा याति मुकुलीकृतलोचना ॥ ८३० ॥
जलमध्ये दीयते दानं प्रतिग्राही न जीवति ।
दातारो नरके यान्ति तस्याहं कुलबालिका ॥ ८३१ ॥
निरक्षरान् वीक्ष्य धनाधिनाथान् त्याज्या न विद्या कृतिभिः कदाचित् ।
आमुक्तमुक्तां कुलटां समीक्ष्य किमार्यनार्यः कुलटा भवन्ति ॥ ८३२ ॥
पत्रं न चित्रमपि निस्त्रप पान्थखेदच्छेदक्षमं विषसमं तव मुग्ध दुग्धम् ।
धूर्तप्रपञ्चितमहातरुकीर्तनेन रे निःफलस् त्वमसि कण्टकितश् च नित्यम् ॥ ८३३
पर्वताग्रे रथो यस्य भूमौ तिष्ठति सारथिः ।
चलितं वायुवेगेन तस्याहं पुत्रबालिका ॥ ८३४ ॥
पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु रत्नसंज्ञाभिधीयते ॥ ८३५ ॥
मन्त्रिणां भिन्नसंधाने भिषजां सन्निपातके ।
कर्मणि व्यज्यते प्रज्ञा स्वस्थे को वा न पण्डितः ॥ ८३६ ॥

---

826 Uda1650 V extra2.

827 Q1 f. 7a, extra. — SRH. 167. 1 (Vyāsa). 828 Q1 extra5.

829 Uda1650 N103 (4, final). — BIS. 1929 (747). Hit. ed. Schl. I. 140. ed. Johns. 156. ed. Rodr. p. 96; SRB. p. 170. 769.

830 Lim1739 f. 8a, extra. 831 Q1 f. 10b, extra.

832 Lim1485 f. 16a, extra. — SRB. p. 173. 859. 833 Q1 extra4.

834 Q1 f. 10b, extra. — SRB. p. 185. 27.

835 Uda1650 V extra1. — BIS. 4186 (4571). Vṛddha-cāṇ. 14. 1. Subhāsh. 104; SRB. p. 29. 6; SRK. p. 1. 6.

836 Uda1650 N102 (3). — BIS. 4706 (2116). Pañc. ed. Koseg. I. 143. ed. Orn. 103. ed. Bomb. 127. 381. Hit. ed. Schl. III, 119. Johns. 124. ed. Calc. 1830. p. 396; SRB. p. 164. 507.

रदननिःपतिता वलिता गता वलिभिरावलितं पलितं वपुः ।
विषयकर्दमदुर्दमवाञ्छया तदपि नात्महितं विहितं जडैः ॥ ८३७ ॥

वाङ्मनःकायशुद्धानां संपदश्च पदे पदे ।
अन्तर्मलिनचित्ताय सुखं स्वप्नेऽपि दुर्लभम् ॥ ८३८ ॥

अलमतिचपलत्वात् स्वप्नमायोपमत्वात्
परिणतिविरसत्वात् सङ्गमेन प्रियायाः ।
इति यदि शतकृत्वस् तत्त्वमालोकयामि
तदपि न हरिणाक्षीं विस्मरत्यन्तरात्मा ॥ ८३९ ॥

उत्तुङ्गशैलशिखरे ननु पादपस्य काकोऽपि पक्वफलमालभते सपक्षः ।
सिंहो बली गजविदारणदारुणोऽपि सीदत्यहो तरुतले निजपक्षहीनः ॥ ८४० ॥

कक्षे किं मितपुस्तकं किमुदकं * काव्यसारोदकं
दीर्घं किं यदि ताडपत्रलिखितं किं चित्र गौडाक्षरं ।
गन्धे किं यदि रामरावणकथासङ्ग्रामगन्धो महत्
किं वारं बहु जल्पसे शृणु सखे नाम्ना पुराणो झषः ॥ ८४१ ॥

क्रियादौषधवत् कामः प्रभुत्वात् केवलश्रमः ।
करवन् निजदारेषु योऽन्यः * * स मन्मथः ॥ ८४२ ॥

गतं न शोचामि कृतं न मन्ये खादन् न गच्छामि हसन् न जल्पे ।
द्वाभ्यां तृतीयो न [भ]वामि राजन् किं कारणं भोज भवामि मूर्खः ॥८४३॥

जङ्घान्तराले विमले विशाले अधोमुखी रोमवने वसन्ती ।
सा पातदेवी भगनामधेयं दन्तैर्विना यान्ति गिरन्ति लिङ्गम् ॥ ८४४ ॥

नाहं कामो महाराज हंसोऽयं विमले जले ।
नीचहंसप्रसङ्गेन मृत्युरेव न संशयः ॥ ८४५ ॥

पूर्वे मांसमिदं न दूषणकृतं कर्णाट गोत्राहनं
याम्ये मातुलजाविवाह बहवो भर्तार पश्चालिके ।
कन्याविक्रय गुर्जरे गृहवधूः सौराष्ट्रमारुस्थले
धन्यो मालवमण्डलो क्षितितले लोकस्य धर्मे रतिः ॥ ८४६ ॥

---

837 Q1 f. 12b, extra. 838 Q1 f. 7a, extra.

839 Haṃ 1074 (Dhanasāra) V extra 33. — BIS. 637. Śāntiś. p. 29; SRB. p. 252. 44 (Bilhaṇa); Śp. 566.

840 Haṃ 1836 V X-14. — BIS. 1193. Subhāsh. 174. 230; SRK. p. 176. 4 (Śp.); SRB. p. 230. 26.

841 Haṃ 1836 V X-13. 842 Haṃ (no number) Ś 49.

843 Haṃ 1836 N VIII-6. 844 Haṃ 1836 Ś, f. 25b, extra.

845 Haṃ 1836 N II-5. 846 Haṃ 1836 V X-12.

मम सखि दहति वसन्तं दक्षिणे वा महन्तं
दहति गिरिलतायां कोकिलामध्यवाक्यम्।
मम पति मतिहीनं दूरदेशो निवासं
दहति मदनबाणं छिन्नभिन्नं शरीरम्॥ ८४७॥

मान्धाता सुमहीपतिः कृतयुगेऽलंकारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकृत्।
अन्ये चापि युधिष्ठिरप्रभृतयो यावद् भवान् भूपते
नैकेनापि समं गता वसुमती मन्ये त्वया यास्यति॥ ८४८॥

यदि वाञ्छसि मूर्खत्वं ग्रामे दिनत्रयं वस।
अपूर्वस्यागमो नास्ति पूर्वाधीतं विनश्यति॥ ८४९॥

रे पान्थ पुस्तकधर क्षणमात्रमेकं
वैद्योऽसि किं गणितशास्त्रविशारदोऽसि।
कामी भवत्यनुदिनं वद कोऽत्र हेतुर्
धिक् तां च तं च मदनं च इमां च मां च॥ ८५०॥

सा बाला वयमप्रगल्भमनसः सा स्त्री वयं कातराः
सा पीनोन्नतिमत्पयोधरयुगं धत्ते सखेदा वयम्।
सा क्रान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयं
दोषैरन्यजनाश्रितैरपटवो जाताः स्म इत्यद्भुतम्॥ ८५१॥

उष्णमन्नं घृतं मद्यं तरुणी क्षीरभोजनम्।
वापीकूपवटच्छाया षडेते बलवर्धनम्॥ ८५२॥

---

847 Ham 1836 V X-15. 848 Ham (no numbers) extra 3. — BIS. 4831. Subhash. 164, 407; SRB. p. 372, 204 (Bhojarāja); Śp. 4002 (Bhojarāja on Muñja).

849 Ham 874 f. 8a, extra. 850 Ham 1836 V X-16. — SRB. p. 354, 74; begins भो पान्थ. — [cd]) केनौषधेन मम पश्यति भर्तुरम्बा किं वा गमिष्यति पतिः सुचिरप्रवासी. 851 Ham 1074 (Dhanasāra) V extral. — BIS. 7002 (3236). Amar. 30. Sāh. D 324; SRB. p. 280, 92; SBH. 1346; SRH. 195, 14 (Amaruka).

852 Ham 1836, N I-6.

Group IV: Apocrypha.

1. The Viṭavṛtta.

[DC 11970; the first stanza is SBH. 10, with the citation "Viṭavṛttasya."]

नितम्बालसगामिन्यः पीनोन्नतपयोधराः ।
मन्मथाय नमस् तस्मै यस्यायतनमङ्गनाः ॥ १ ॥
मुदितमनोभवहासो रमणोरसि मुष्टिघातजो जयति ।
श्रुतिसुखमणितविमिश्रो वलयावलिकलकलो विलासिन्याः ॥ २ ॥
यासामर्जनशीलत्वान् न द्वेष्योऽस्ति न च प्रियः ।
न कृतं न च सद्भावो वञ्चनाबद्धचेतसाम् ॥ ३ ॥
आकारवेषसौभाग्यैः कन्दर्पप्रतिमोऽपि सन् ।
यासां संगममासाद्य प्राप्तः को वा न वञ्चनाम् ॥ ४ ॥
आजीवोच्छित्तये यासां प्रीतिद्वेषावुभौ हि तौ ।
कथं नु खलु तौ तासां स्यातामुपरि कस्यचित् ॥ ५ ॥
पश्चात्तापकरो यासां सर्वनाशसमुद्भवः ।
सदावसानविरसः संगमो जायते नृणाम् ॥ ६ ॥
आसमस्ताक्षिविक्षेपसमर्पितमनोभुवाम् ।
मन्मथोद्दीपनं तासां विटवृत्तं विधास्यते ॥ ७ ॥
रमन्ते किं न पशवः प्राणिधर्मानुवर्तिनः ।
वैदग्ध्यं कीदृशं पुंसां विटवृत्तमजानताम् ॥ ८ ॥
विटवृत्तं पठन् नार्या नरो यद्यपि मुह्यति ।
तथाप्यत्र विशेषोऽस्ति संनद्धस्येतरस्य वा ॥ ९ ॥
यत्र तत्रावलग्नासु प्रतिक्षणनिवर्तिषु ।
संपत्स्विव विदग्धानां रतिर्वेश्यासु कीदृशी ॥ १० ॥
विनोदमात्रमेवेदमिति यस्यावधारणा ।
विटवृत्तं स जानाति स कामफलमश्नुते ॥ ११ ॥
उदयस्थः सहस्रांशुर्दृष्टेरायाति गम्यताम् ।
अतिरिक्तं कदा कं वा लङ्घयन्ति न योषितः ॥ १२ ॥
आकारसंवृतिः कार्या सुरक्तेनापि कामिना ।
रक्तः परिभवं याति परिभूतः कथं प्रियः ॥ १३ ॥
अरक्ते न सुखं वेत्ति नारक्तो दुःखमश्नुते ।
दुःखानां च सुखानां च रक्त एवास्पदं सदा ॥ १४ ॥

रक्तः श्वसिति दीर्घाणि रक्तो लज्जां विमुञ्चति ।
नाकार्यमीक्षते रक्तोऽरक्तो यात्यपहास्यताम् ॥ १५ ॥
परतन्त्रः सदा रक्तश् चरणौ पण्ययोषिताम् ।
नापिताङ्गुष्ठवत् कामी संस्पृष्टं लभते यदि ॥ १६ ॥
शेते मया यथा सार्धं सान्येनापि तथा यदि ।
हा हतोऽस्मीति संरक्तो ध्यायन्नित्थं न जीवति ॥ १७ ॥
क आलप्तः प्रियः कोऽस्याः कं ध्यायति कमीक्षते ।
इति चिन्ता न यस्यासीत् स पूज्यः पण्ययोषिताम् ॥ १८ ॥
सुप्तान्येन सहान्येयं श्वो मां संभावयिष्यति ।
न चेच् छ्लो विततं किं स्यादिति ध्यायन् प्रियो भवेत् ॥ १९ ॥
सेवतेऽवसरप्राप्तावप्राप्तौ यो न दुःखितः ।
न दुःखाभिभवस् तस्य पण्यनारीषु जायते ॥ २० ॥
सुखोपायमशक्यं च यस्य चेष्टितमीदृशम् ।
नासावपैति मनसः स्त्रीणामा मरणादपि ॥ २१ ॥
नाकाले नानवसरे या नुक्ता दूतपूर्वकम् ।
वेश्यावेश्मनि कर्तव्यं नान्यत् कामुकसंनिधौ ॥ २२ ॥
नात्यन्तं दर्शयेद् देयं न चात्यन्तमदर्शनम् ।
ईर्ष्याभावो न चात्यन्तं कोपो नात्यन्तमिष्यते ॥ २३ ॥
ईर्ष्याद्धि कुप्यते वेश्या प्रसङ्गाच् च विरज्यते ।
लब्धातिगमनाच् चापि दानादपि विलुप्यते ॥ २४ ॥
ग्राह्यं नाम न चान्यस्य कामुकस्य तदग्रतः ।
प्रसङ्गो नातिकर्तव्यं पूर्वं किंचिन् न सूचिते ॥ २५ ॥
द्वेष्यः स्यात् सूचिताभावे प्रयात्यन्यत्र कौतुकम् ।
अकामा चान्यकामा च निद्राक्रान्तेक्षणापि वा ।
असंजातरतेच्छा च नाभियोज्याबला बलात् ॥ २६ ॥
आविष्करोति न स्नेहं रागं बध्नाति नो रते ।
अभियुक्ता तु मन्देच्छा सान्यकामा तु कामिनी ॥ २७ ॥
आलापयत्यकार्याणि किंचिदाख्याति वा स्वयम् ।
या न प्रयाति शयनं साप्यनुत्पन्नसस्पृहा ॥ २८ ॥
संचिन्तिता किमन्यं कं को वान्यो हृदये स्थितः ।
ज्ञातमेव मया त्वेष यथाहं न प्रियस् तव ॥ २९ ॥

आगतोऽहं * * * * * * * * न चेक्षितः ।
गाढालिङ्गननिर्वाणं कदाहं प्रापितस् त्वया ॥ ३० ॥
कामिनश् चरितैरेभिः कुर्वन्तो निशि जागरम् ।
कुर्वन्त्यप्रियमात्मानं केचिन् मूढाः प्रिया अपि ॥ ३१ ॥
नीत्वात्मानं प्रकाशत्वमन्यया योषिता सह ।
कारयेत् कलहं कामी प्रीतिमिच्छन् सदात्मनः ॥ ३२ ॥
यत्र यत्र करोतीर्ष्यां कलहो वा यया सह ।
यया कामुकवैरं च निवारयति यां प्रति ॥ ३३ ॥
उक्तस् ते रुधिरेणाहं स्पृष्टं ते मस्तकं मया ।
इत्येतांश् शपथान् कृत्वा सा वै गम्या पुनः पुनः ॥ ३४ ॥
प्रतिकूलतमं यद्यदेकस्मिञ्शयने स्त्रियः ।
वामत्वात् पुष्पधनुषस् तत् तत् प्रेमनिबन्धनम् ॥ ३५ ॥
ग्राह्यं नाम विपक्षस्य मृषासुप्तेन कामिना ।
प्रतिभेदे कृतं शीघ्रं कर्तव्यो निह्नवः सदा ॥ ३६ ॥
रात्रौ सुरतसंभोगलालसा शयने [र]ता ।
विपक्षप्रेष्ययत्नानां सुक्तवाचानभिज्ञता ॥ ३७ ॥
तिष्ठ तावदयं कोऽपि बहिः किमपि जल्पति ।
इत्युक्त्वा निर्गतः शीघ्रमपि देवकुलं व्रजेत् ॥ ३८ ॥
त्यक्त्वा स मां कथं नाम गत्वा सुप्तस् तया सह ।
इति चिन्ताकृतोऽमर्षः प्रादुर्भवति चेतसि ॥ ३९ ॥
आमर्षान् मदनः सद्यो दीप्तश् चेतसि जायते ।
स वृद्धिं नीयते कामं तस्मिन् द्वेष्येऽपि योषिताम् ॥ ४० ॥
चिन्तितं यदनेनासीद् देयं बह्वल्पमेव वा ।
देयं तेनाधुना तस्यै कालेनेति न संशयः ॥ ४१ ॥
हस्ते कृता सुरूपा च फलेनापि सुयोजिता ।
वीटिकेवाङ्गना रागं न हि बध्नाति खण्डिता ॥ ४२ ॥
कुट्टिन्या सह कर्तव्यः कलहो निपुणस् तथा ।
समुपैति यथा द्वेषं तत्पुरं प्रोच्यतेऽपि यः ॥ ४३ ॥
किमस्माकमनेनेति कुट्टिन्या यत्र वार्यते ।
कामुके कामिनी तस्मिन् नितरामनुरज्यते ॥ ४४ ॥
गुरुबन्धुसुहृद्वर्गप्रतिषेधेन्धनेरितम् ।
मदनाग्निर्ज्वलत्युच्चैर्योषितः पुरुषस्य वा ॥ ४५ ॥

विटानां चरितैरेभिः कषायैस् तु कषायिता ।
सुतरां रज्यते नारी न च रागं विमुञ्चति ॥ ४६ ॥
नारी रक्तानुरक्ता चाप्यतिरक्ता तथापरा ।
संक्षेपात् कामतन्त्रज्ञैस् त्रिविधैव निगद्यते ॥ ४७ ॥
नाभिलाषो रते यस्याः पूर्वं समुपजायते ।
प्रयुक्ते च न चोद्वेगं सा रक्ता संप्रकीर्तिता ॥ ४८ ॥
रतिं प्रार्थयते या तु तत्र याति परां मुदम् ।
न च तेन विनैवास्ते सानुरक्ताभिधीयते ॥ ४९ ॥
प्राप्तापि रतिसंभोगं रतेच्छां या न मुञ्चति ।
अभियोक्त्री भवेद् भूयः सातिरक्ता प्रकीर्तिता ॥ ५० ॥
यथोक्तलक्षणैर्ज्ञेया यथायोगं विपर्ययात् ।
त्रिविधैव विरक्तोक्ता कामिनी कामपण्डितैः ॥ ५१ ॥
त्रिविधस् तु मतः कामी प्रियोऽनुप्रिय एव च ।
अतिप्रियस् तु विज्ञेयस् तृतीयः कामवेदिभिः ॥ ५२ ॥
प्रथमायाः प्रियो ज्ञेयो मध्यमायास् त्वनुप्रियः ।
अतिप्रियस् तृतीयायास् तथा योऽन्यो न सेवते ॥ ५३ ॥
प्रबोधयति या सुप्तं निद्रया नाभिभूयते ।
भूयः सुरतमप्राप्य नैवास्तेनातिरागिणी ॥ ५४ ॥
या तु पश्यत्यपश्यन्तं मदमायाति वीक्षिता ।
वीक्षितं चेक्षते नित्यं विज्ञेया सानुरागिणी ॥ ५५ ॥
रक्ताल्पमपि या दानं कामिनी बहु [म]न्यते ।
अतोऽन्यथापि विज्ञेया विपरीता विचक्षणैः ॥ ५६ ॥
गत्वा वेश्यासु विश्वासं प्रियोऽस्मीति च कामिना ।
वेश्यागृहे न न्यस्तव्यं सारद्रव्यं कदाचन ॥ ५७ ॥
अनृजुत्वमसद्भावं कार्पण्यं चलचित्तता ।
पुंसां मित्रेषु ये दोषास् ते वेश्यासु गुणाः स्मृताः ॥ ५८ ॥
क्षीणठक्कुरदत्तस्य वेश्याहस्तगतस्य च ।
निक्षिप्तस्य किरातेन पुनर्मोक्षो न विद्यते ॥ ५९ ॥
मरुदेशसमुत्पन्नशिलासलिलसंनिभम् ।
कामिना सर्वदा दाहं वेश्यास्त्रीषु प्रशस्यते ॥ ६० ॥
देशकालानतिक्रान्तमसूचितमयाचितम् ।
सोपयोगं तथाल्पं च दानं प्रेमनिबन्धनम् ॥ ६१ ॥

यावद् ददाति नाशेषमहार्यं पण्ययोषिताम् ।
तावदप्रियमप्येनं भुञ्जते प्रियवद् बलात् ॥ ६२ ॥
युगपद् बहु संप्राप्य वेश्या त्यजति कामिनम् ।
सपदि प्रियमप्येनं वैरं वा कुरुते ध्रुवम् ॥ ६३ ॥
दातव्यं मुखताम्बूलमप्रियेण प्रियेण वा ।
अवल्लभेन नात्यर्थं तदेवेष्टजनप्रियम् ॥ ६४ ॥
वयः शीतन्त्वचीमुस्तान्धूपोऽल्पो मुखवासकम् ।
पत्रं खदिरसंयुक्तं तथा सर ········· ॥ ६५ ॥
विटैरेवं तु वामानामेतान्येवंविधानि तु ।
देशकालोपपन्नानि प्रीयते न च तद्वचः ॥ ६६ ॥
ताम्बूलं मदिरा माल्यं सुगन्धं च विलेपनम् ।
अतिव्ययेन दातव्यं रतिकालोपयोगतः ॥ ६७ ॥
विटैरनेकवेश्यानामेकान्येवंविधानि तु ।
देशकालोपपन्नानि प्रियाण्येव न चाप्रियम् ॥ ६८ ॥
इमानि प्रायशस्तानि वेश्यास्वेवं प्रदापयेत् ।
सा भुङ्क्त्यचिरात् सर्वमुपभोगं तदात्मनः ॥ ६९ ॥
प्रत्यागतेन संपर्कं निर्विघ्नमभिवाञ्छता ।
न देयं गच्छताध्वानं योषितां पूर्वकल्पितम् ॥ ७० ॥
आलोकयति पन्थानं दास्यतीत्यागतः किल ।
रचयत्यादराद् वेणीं यदि नान्यैर्वशीकृता ॥ ७१ ॥
अपरित्यक्तमात्मानमिच्छता पण्ययोषिताम् ।
नित्यौपयोगिकं द्रव्यमात्मसारं प्रदर्शयेत् ॥ ७२ ॥
ग्राह्यं ग्रहणकं किंचिद् व्यपदेशेन केनचित् ।
हस्ते तिष्ठति तद्यावत् तावदन्यं न सेवते ॥ ७३ ॥
कुतश्चित् संप्रदर्श्यैव केयूरमकरादिकम् ।
कुट्टिन्या च सहोद्धारं तत्राम्नैवाभिलेखयेत् ॥ ७४ ॥
वेश्यया सह संभोगं नीत्वा द्रव्यं तदात्मनः ।
कृत्वा तदवशिष्टेन [देयं] दत्त्वा प्रशस्यते ॥ ७५ ॥
यस्मिन् प्रार्थयते काले सुवर्णं पूर्वमर्पितम् ।
तद्विटस्यातिसंधातुं न्याय्यं तत्रेदमुत्तरम् ॥ ७६ ॥
स्वयं देयः स उद्धारस्तुल्यमत्राल्पयापि वा ।
सर्वं च मातृनाम्नैव वणिजं किं न पृच्छसि ॥ ७७ ॥

यदि वा रक्तया दत्तं तथापि त्वं न शोभसे ।
अहं गोपायिता तस्य कस्योक्तं वा मया पुनः ॥ ७८ ॥

कोशात् तदप्यधिष्ठानं कर्तव्यं शुद्धचेतसा ।
शपथी हीनदोषाय कामिनीषूच्यते बुधैः ॥ ७९ ॥

कुट्टिनीनां पुरो देयो व्यवहारस् तु कामिना ।
वेश्यां यो नातिसंधत्ते मूढोऽसाविति साध्यते ॥ ८० ॥

तदेवार्थयते येन पूर्वोक्तं नोत्तरं स्पृहा ।
यथार्थं व्यवहारज्ञा वेश्या भूयो न वञ्च्यते ॥ ८१ ॥

नासावा मरणादित्थं परित्यजति तं विटम् ।
उभयोस्त्यागजं दुःखं कः कुर्यादर्थमित्रयोः ॥ ८२ ॥

हितमिममुपदेशं कुर्वता लोकदृष्टिं मितमपरिमितार्थं यन्मयोपात्तमत्र ।
जनितयुवतिरागाः सन्तु पुण्येन तेन प्रतिहतरतिविघ्नाः प्राणिनः सौख्यभाजः ८३

जानकीवदनोल्लासहेतुं सेतुं बबन्ध यः ।
तत्पादसेविनालेखि विटवृत्तं द्विजन्मनाम् ॥ ८४ ॥

॥ इति विटवृत्तम् ॥

2 The Vijñānaśataka.

[In reporting variants, N refers to the Nāgpur edition of 1897, B to the current Bombay edition; B śloka numbers are given in brackets or footnotes wherever they differ from N numbers.]

विगलदमलदानश्रेणिसौरभ्यलोभोपगतमधुपमालाव्याकुलाकाशदेशः ।
अवतु जगदशेषं शश्वदुग्रात्मजो यो विपुलपरिघदन्तोद्दण्डशुण्डो गणेशः ॥ १ ॥
यत्सत्तया शुचि विभाति यदात्मभासा प्रद्योतितं जगदशेषमपास्तदोषम् ।
तद् ब्रह्म निष्कलमसङ्गमपारसौख्यं प्रत्यग् भजे परममङ्गलमद्वितीयम् ॥ २ ॥
माता मृता जनयितापि जगाम शीघ्रं लोकान्तरं तव कलत्रसुतादयोऽपि ।
भ्रातस् तथापि न जहासि मृषाभिमानं दुःखात्मके वपुषि मूत्रकुदर्पकूपे ॥ ३ ॥
ब्रह्मामृतं भज सदा सहजप्रकाशं सर्वान्तरं निरवधि प्रथितप्रभावम् ।
यद्यस्ति ते जिगमिषा सहसा भवाब्धेः पारे परे परमशर्मणि निष्कलङ्के ॥ ४ ॥
आरभ्य गर्भवसतिं मरणावसानं यद्यस्ति जीवितुमदृष्टमनेककालम् ।
जन्तोस् तथापि न सुखं सुखविभ्रमोऽयं यद् बालया रतिरनेकविभूतिभाजः ॥ ५
सा रोगिणी यदि भवेदथ वा विवर्णा बाला प्रिया शशिमुखी रसिकस्य पुंसः ।
शल्यायते हृदि तथा मरणं कृशाङ्ग्यायत्तस्य सा विगतनिद्रसरोरुहाक्षी ॥ ६ ॥
स्वत्साक्षिकं सकलमेतदवोचमित्थं भ्रातर्विचार्य भवता करणीयमिष्टम् ।
येनेदृशं न भविता भवतोऽपि कष्टं शोकाकुलस्य भवसागरमग्नमूर्तेः ॥ ७ ॥
निष्कण्टकेऽपि न सुखं वसुधाधिपत्ये कस्यापि राजतिलकस्य यदेष देवः ।
विश्वेश्वरो भुजगराजविभूतिभूषो हित्वा तपस्यति चिरं सकला विभूतीः ॥ ८ ॥
भूमण्डलं लयमुपैति भवत्यबाधं लब्धात्मकं पुनरपि प्रलयं प्रयाति ।
आवर्तते सकलमेतदनन्तवारं ब्रह्मादिभिः सममहो न सुखं जनानाम् ॥ ९ ॥

यदा देवादीनामपि भवति जन्मादि नियतं
महाहर्म्यस्थाने ललितललनालोलमनसाम् ।
तदा कामार्तानां सुगतिरिह संसारजलधौ
निमग्नानामुच्चै रतिविषयशोकादिमकरे ॥ १० ॥ (४७)

स्वयं भोक्ता दाता वसु सुबहु संपाद्य भविता
कुटुम्बानां पोष्टा गुणनिधिरशेषेप्सितनरः ।
इति प्रत्याशस्य प्रबलदुरितानीतविधुरं
शिरस्यस्याकस्मात् पतति निधनं येन भवति ॥ ११ ॥ (७२)

---

1 [c]) N °त्मदर्य्यो ?; B °त्मदर्पो. — [d]) B °परिघिदन्तो°. 2 [a]) B सदिवमस्ति (for शुचि विभाति). 6 [c]) B कृशाङ्गी (for कृशाङ्ग्या-). 7 [c]) B भवति (for भविता). 8 [d]) B विभूतिः. 10 [b]) B महारम्ये स्थाने.

B numbers: 3 = 61, 4 = 29, 5 = 59, 6 = 69. 7 = 64, 8 = 70, 9 = 74.

विपश्चिद् देहादौ क्वचिदपि ममत्वं न कुरुते
परब्रह्मध्याता गगननगराकारसदृशे ।
निरस्ताहंकारः श्रुतिजनितविश्वाससुभितो
निरातङ्कोऽव्यग्रः प्रकृतिमधुरालापचतुरः ॥ १२ ॥

अरे चेतश् चित्रं भ्रमसि यदपास्य प्रियतमं
मुकुन्दं पार्श्वस्थं पितरमपि मान्यं सुमनसाम् ।
बहिः शब्दाद्यर्थे प्रकृतिचपले क्लेशबहुले
न ते संसारेऽस्मिन् भवति सुखदाद्यापि विरतिः ॥ १३ ॥ (७६)

न जानीषे मूर्खे क्वचिदपि हितं लोकमहितं
भ्रमद्भोगाकाङ्क्षाकलुषिततया मोहबहुले ।
जगत्यत्रारण्ये प्रतिपदमनेकापदि सदा
हरिध्याने व्यग्रं भव सकलतापैककदने ॥ १४ ॥ (४८)

वियद्भूतं भूतं यदवनलभं (?) चाखिलमिदं
महामायासङ्गाद् भुजग इव रज्ज्वां भ्रमकरम् ।
तदत्यन्ताह्लादं ह्यजरममरं चिन्तय मनः
परब्रह्माव्यग्रं हरिहरसुराद्यैरवगतम् ॥ १५ ॥ (२३)

न चेत् ते सामर्थ्यं भवनमरणातङ्कहरणे
मनोऽनिर्दिष्टेऽस्मिन्नपगतगुणे ज्ञातुमकले ।
तदा मेघश्यामं कमलदलदीर्घाक्षममलं
भजस्व श्रीरङ्गं शरदमृतधामाधिकमुखम् ॥ १६ ॥

क्व यातः क्वायातो द्विज कलयसे रत्नमटवीम्
अटन् व्याघ्राघ्रातो मरणमगमद् विश्वमहितः ।
अयं विद्यारामो मुनिरह ह केनापि विदुषा
न खल्वात्मप्रायो भवतु सुकरो ज्ञातुमशिवः ॥ १७ ॥ (*)

अहं श्रान्तोऽध्वानं बहुविधमतिक्रम्य विषमं
धनाकाङ्क्षाक्षिप्तः कुनृपतिमुखालोकनपरः ।
इदानीं केनापि स्थितिमुदरकूपस्य भरणे
कदन्नेनारण्ये क्वचिदपि समीहे स्थिरमतिः ॥ १८ ॥ (७७)

---

12 [c]) B °विश्वाससुभगो. 14 [a]) B चेतः (for मूर्खे). 15 [a]) B वियत्पृथ्वीवायुज्वलनजलजं चाखि°. — [c]) N विजरममरं. 16 [b]) N अवगत- (for अपगत-).
17 Omitted in B.

यमाराध्याराध्यं त्रिभुवनगुरोरासवसतिर्
ध्रुवो ज्योतिश्चक्रे सुचिरमनवद्यं शिशुरपि ।
अवाप प्रह्लादः परमपदमाराध्य यमितः
स कस्मात्क्लेशो हरति न हरिः कीर्तितगुणः ॥ १९ ॥ (८)

कदाचित् कष्टेन द्रविणमधमाराधनवशान्
मया लब्धं स्तोकं निहितमवनौ तस्करभयात् ।
ततो नित्ये कश्चित् क्वचिदपि तदाखुर्बिलगृहेऽ-
नयल्लुब्धोऽप्यर्थो न भवति यदा कर्म विषमम् ॥ २० ॥ (७१)

जगाम व्यर्थं मे बहुदिनमथार्थार्थिततया
कुभूमीपालानां निकटगतिदोषाकुलमतेः ।
हरिध्यानव्यग्रं भवितुमधुना वाञ्छति मनः
क्वचिद् गङ्गातीरे तरुणतुलसीसौरभभरे ॥ २१ ॥ (५६)

कदा भागीरथ्या भवजलधिसंतारतरणेः
स्खलद्वीचीमालाचपलतलविस्तारितमुदः ।
तमःस्थाने कुञ्जे क्वचिदपि निविश्याहृतमना
भविष्याम्येकाकी नरकमथने ध्यानरसिकः ॥ २२ ॥ (८५)

कदा गोविन्देति प्रतिदिवसमुल्लासमिलिताः
सुधाधाराप्रायास् त्रिदशतटिनीवीचिमुखरे ।
भविष्यन्त्येकान्ते क्वचिदपि निकुञ्जे मम गिरो
मरालीचक्राणां स्थितिसुखरवाक्रान्तपुलिने ॥ २३ ॥ (८६)

यदध्यस्तं सर्वं स्रजि भुजगवद् भाति पुरतो
महामायोद्गीर्णं गगनपवनाद्यं तनुभृताम् ।
भवेत् तस्या भ्रान्तेर्मुररिपुरधिष्ठानमुदये
यतो न स्याद् भ्रान्तिर्निरधिकरणा क्वापि जगति ॥ २४ ॥ (२२)

चिदेव ध्यातव्या सततमनवद्या सुखतनुर्
निराधारा नित्या निरवधिरविद्यादिरहिता ।
अनास्थामास्थाय भ्रमवपुषि सर्वत्र विषये
सदा शेषव्याख्यानिपुणमतिभिः ख्यातयतिभिः ॥ २५ ॥ (३०)

---

19 [a]) B °गुरुं प्राप वसतिं (for °गुरोरासवसतिर्). — [b]) B अनवद्यां. 20 [a]) B नैजे (for नित्ये). 21 [a]) B °मथार्थार्थि तनयाः. — [b]) B निकटमतिदोषा°. 22 [a]) B °संसारतरणेः. 23 [a]) B °मिलितः. — [d]) B श्रुति- (for स्थिति-). 24 [a]) B कुदयं (for उदये).

अहोऽस्त्यर्थेऽप्यर्थे श्रुतिशतगुरुभ्यामवगते
निषिद्धत्वेनापि प्रतिदिवसमाधावति मनः।
पिशाचस्स् तत्रैव स्थिररतिरसारेऽपि चपलो
न जाने केनास्य प्रतिकृतिरनार्यस्य भविता ॥ २६ ॥ (७५)

नित्यानित्यपदार्थतत्त्वविषये नित्यं विचारः सतां
संसर्गे मितभाषिता हितमिताहारोऽनहंकारिता।
कारुण्यं कृपणे जने सुखिजने प्रीतिः सदा यस्य स
प्रायेणैव तपः करोति सुकृती चेतोमुकुन्दप्रियः ॥ २७ ॥ (१३)

सा गोष्ठी सुहृदां निवारितसुधास्वादाधुना क्वागमत्
ते धीरा धरणीधरोपकरणीभूता ययुः क्वापरे।
ते भूपा भवभीरवो भवरताः क्वागुर्निरस्तारयो
हा कष्टं क्व च गम्यते न हि सुखं क्वाप्यस्ति लोकत्रये ॥२८॥ (७८)

भानुर्भूवलयप्रदक्षिणगतिः क्रीडारतिः सर्वदा
चन्द्रोऽप्येष कलानिधिः कवलितः स्वर्भानुना दुःखितः।
ह्रासं गच्छति वर्धते च सततं गीर्वाणविश्रामभूस्
तत् स्थानं खलु यत्र नास्त्यपहतिः क्लेशस्य संसारिणाम् ॥२९॥ (७३)

संसारेऽपि परोपकारकरणख्यातव्रता मानवा
ये संपत्तिगृहा विचारचतुरा विश्वेश्वराराधकाः।
तेऽप्येनं भवसागरं जनिमृतिग्राहाकुलं दुस्तरं
गम्भीरं सुतरां तरन्ति विविधव्याध्याधिवीचीमयम् ॥ ३० ॥ (१४)

रे रे चित्त मदान्ध मोहबधिरा मिथ्याभिमानोद्धता
व्यर्थेयं भवतां धनावनरतिः संसारकारागृहे।
बद्धानां निगडेन गात्रममतासंज्ञेन यत्कर्हिचिद्
देवब्राह्मणभिक्षुकादिषु धनं स्वप्नेऽपि न व्येति वः ॥ ३१ ॥ (५२)

यावत् ते यमकिंकराः करतलक्रूरासिपाशादयो
दुर्दान्ताः सृणिराजदीर्घसुनखादंष्ट्राकरालाननाः।
नाकर्षन्ति नरान् धनादिरहितान् यत् तावदिष्टेच्छया
युष्माभिः क्रियतां धनस्य कृपणास् त्यागः सुपर्वादिषु ॥३२॥ (६)

---

26 [c]) N चपलं (for चपलो). 27 [d]) B शश्वन्मुकुन्द°. 31 [a]) B चित्तमदान्ध.

देहाद्यात्ममतानुसारि भवतां यद्यस्ति मुग्धं मतं
  वेदव्यासविनिन्दितं कथमहो पित्राद्यपत्ये तदा ।
दाहादिः क्रियते विशुद्धफलको युष्माभिरुद्वेजितैः
  शोकेनार्थपरायणैरपसदैर्दृष्टार्थमात्रार्थिभिः ॥ ३३ ॥ (११)

अद्य श्वो वा मरणमशिवं प्राणिनां कालपाशैर्
  आकृष्टानां जगति भवतो नान्यथात्वं कदाचित् ।
यद्यप्येवं न खलु कुरुते हा तथाप्यर्थलोभं
  हित्वा प्राणी हितमवहितो देवलोकानुकूलम् ॥ ३४ ॥ (५१)

दष्टप्रायं विकलमखिलं कालसर्पेण विश्वं
  क्रूरेणेदं शिव शिव मुने ब्रूहि रक्षाप्रकारम् ।
अस्त्यास्त्येकं शृणु मुररिपोर्ध्यानपीयूषपानं
  त्यक्त्वा नान्यत् किमपि भुवने दृश्यते शास्त्रदृष्ट्या ॥ ३५ ॥ (६७)

ध्यानव्यग्रं भवतु तव हृत्तिष्ठतो यत्र तत्र
  श्रीमद्विष्णोस् त्रिभुवनपतेर्नित्यमानन्दमूर्तेः ।
लक्ष्मीचेतःकुमुदविपुलानन्दपीयूषधाम्नो
  मेघच्छायाप्रतिभटतनोः क्लेशसिन्धुं तितीर्षोः ॥ ३६ ॥ (१९)

कामव्याघ्रे कुमतिफणिनि स्वान्तदुर्वारनीडे
  मायासिंहीविहरणमहीलोभभल्लूकभीमे ।
जन्मारण्ये न भवति रतिः सज्जनानां कदाचित्
  तत्त्वज्ञानां विषयतुषिताकण्टकाकीर्णपार्श्वे ॥ ३७ ॥ (६२)

यामासाद्य त्रिलोकीजनमहितशिवावल्लभारामभूमिं
  ब्रह्मादीनां सुराणां सुखवसतिभुवो मण्डलं मण्डयन्तीम् ।
नो गर्भे व्यालुठन्ति क्वचिदपि मनुजा मातुरुत्क्रान्तिभाजस्
  तां काशीं नो भजन्ते किमिति सुमतयो दुःखभारं वहन्ते ॥३८॥(९३)

किं कुर्मः कं भजामः किमिह समुदितं साधनं भो वयस्याः
  संसारोन्मूलनाय प्रतिदिवसमिहानर्थशङ्कावतारः ।
आतङ्कोतं निदानं भवभयदलने संगतं सज्जनानां
  तां काशीमाश्रयामो निरुपमयशसः स्वः स्रवन्त्या वयस्याम् ॥३९(९७)

---

34 [a]) N अशिवप्राणिनां. — [b]) B भवति (for भवतो). 35 [a]) B दष्टं प्रायो (for दष्ट-). — [c]) N श्रुणु. 36 [a]) B हृदयं (for तव हृत्). 37 [b]) B °वने (for °मही-). — [c]) B जन्मन्यस्मिन्भवति विरतिः. — [d]) B विषयविषमाकण्ट°. 38 [b]) B °भुवां मण्डलं मण्डयन्ति. — [d]) B वहन्तः (for वहन्ते). 39 [a]) N किं (for भो).

मुक्तिः क्वापि न मुक्तिरस्त्यभिमता काप्यस्ति मुक्तिर्न सा
काश्यामस्ति विशेष एव सुतरां श्लाघ्यं यदेतद् द्वयम् ।
सर्वैरुत्तममध्यमाधमजनैरासाद्यतेऽनुग्रहाद्
देवस्य त्रिपुरद्विषः सुरधुनीस्नानावदातव्ययैः ॥ ४० ॥ (९८)

विद्यन्ते द्वारकाद्या जगति बहुविधा देवताराजधान्यो
यद्यप्यन्यास् तथापि स्खलदमलजलावर्तगङ्गातरङ्गा ।
काश्येवारामकूजत्पिकशुकचटकाक्रान्तदिक्कामिनीनां
क्रीडाकासारशाला जयति मुनिजनानन्दकन्दैकभूमिः ॥ ४१ ॥ (९४)

काशीयं समलंकृता निरुपमस्वर्गापगासंभव-
स्थूलोत्तारतरङ्गबिन्दुविलसन्मुक्ताफलश्रेणिभिः ।
चञ्चच्चञ्चलचञ्चरीकनिकरश्यामाम्बरा राजते
कासारस्थविनिद्रपद्मनयना विश्वेश्वरप्रेयसी ॥ ४२ ॥ (९५)

वह्निप्राकारबुद्धिं जनयति वलभीवासिनां नागराणां
गन्धारण्यप्रसूतस्फुटकुसुमचयः किंशुकानां शुकानाम् ।
चञ्चत्कारो वसन्ते परमपदपदं राजधानी पुरारेः
सा काश्यारामरम्या जयति मुनिजनानन्दकन्दैकभूमिः ॥ ४३ ॥ (९६)

भजत विबुधसिन्धुं साधवो लोकबन्धुं
हरहसिततरङ्गं शंकराशीर्षसङ्गम् ।
दलितभवभुजंगं ख्यातमायाविभङ्गं
निखिलभुवनवन्द्यं सर्वतीर्थानवद्यम् ॥ ४४ ॥ (८७)

यदमृतममृतानां भङ्गरङ्गप्रसङ्ग-
प्रकटितरसवत्तावैभवं पीतमुच्चैः ।
दलयति कलिदन्तांस् तां सुपर्वस्रवन्तीं
किमिति न भजतातां ब्रह्मलोकावतीर्णाम् ॥ ४५ ॥ (८८)

स्वाधीने निकटस्थितेऽपि विमलज्ञानामृते मानसे
विख्याते मुनिसेवितेऽपि कुधियो न स्नान्ति तीर्थे द्विजाः ।
यत्तत्कष्टमहो विवेकरहितास् तीर्थार्थिनो दुःखिता
यत्र क्वाप्यटवीमटन्ति जलधौ मज्जन्ति दुःखाकरे ॥ ४६ ॥ (६३)

---

41 [a]) N कति न ता (for बहुविधा). — [d]) Ms. °शाला कुसुमपरिमलाकृष्टहृष्टालिमाला. 42 [a]) N °व्योमगा- (for °संभव°). — [c]) N °निकराराग़ाम्बरा. 45 [a]) B पयमृतं°. — [c]) B कलिदोषांस्तां. 46 [d]) N has a lacuna for मज्ज°—°करे.

नाभ्यस्तो धातुवादो न च युवतिवशीकारकः कोऽप्युपायो
  नो वा पौराणिकत्वं न सरसकविता नापि नीतिर्न गीतिः ।
तस्मादर्थार्थिनां या न भवति भवतश्च चातुरी कापि विद्वन्
  ज्ञात्वेत्थं चक्रपाणेरनुसर चरणाम्भोजयुग्मं विभूत्यै ॥ ४७ ॥ (५३)
अर्थेभ्योऽनर्थजातं भवति तनुभृतां यौवनादिष्ववश्यं
  पित्राद्यैरर्जितेभ्योऽनुपकृतिमतिभिः स्वात्मनैवार्जितेभ्यः ।
यस्माद् दुःखाकरेभ्यस्त्व तमनुसर सदा भद्र लक्ष्मीविलासं
  गोपालं गोपकान्ताकुचकलशतटीकुङ्कुमासङ्गरङ्गम् ॥ ४८ ॥ (५४)
भ्रातः शान्तं प्रशान्ते क्वचिदपि निपतन् मित्र रे भूधराग्रे
  ग्रीष्मे ध्यानाय विष्णोः स्पृहयसि सुतरां निर्विशङ्के गुहायाम् ।
अन्विष्यंस्त्व तादृगत्र क्षितिवलयतले स्थानमुन्मूल यावत्
  संसारानर्थवृक्षं प्रथिततममहामोहमूलं विशालम् ॥ ४९ ॥ (१७)
केदारस्थानमेकं रुचिरतरगुमानाढ्यलीलावनीकं
  प्रालेयाद्रिप्रदेशे प्रथितमतितरामस्ति गङ्गानिवेशे ।
ख्यातं नारायणस्य त्रिजगति बदरीनाम सिद्धाश्रमस्य
  तत्रैवानादिमूर्तेर्मुनिजनमनसामन्यदानन्दमूर्तेः ॥ ५० ॥ (१००)
सन्त्यन्ये त्रिदशापगादिपतनादेव प्रयागादयः
  प्रालेयाचलसंभवा बहुफलाः सिद्धाश्रमाः सिद्धयः ।
यत्राघौघसहा भवन्ति सुधियां ध्यानेश्वराणां चिरं
  मुक्ताशेषभियां विनिद्रमनसां कन्दाम्बुपर्णाशिनाम् ॥ ५१ ॥ (९९)
किं स्थानस्य निरीक्षणेन मुरजिद्ध्यानाय भूमण्डले
  भ्रातश्चेद् विरतिर्भवेद् दृढतरा यस्य स्रगादौ सदा ।
तस्यैषा यदि नास्ति हन्त सुतरां व्यर्थं तदन्वेषणं
  स्थानस्थानधिकारिणः सुरधुनीतीराद्रिकुञ्जादिषु ॥ ५२ ॥ (४४)
स्वान्तव्योम्नि निरस्तकल्मषघने सद्बुद्धितारावली-
  संदीप्ते समुदेति चेन् निरुपमानन्दप्रभामण्डलः ।
ब्रह्मज्ञानसुधाकरः कवलिताविद्यान्धकारस्त्व तदा
  क्व व्योम क्व सदागतिः क्व हुतभुक् क्वाम्भः क्व सर्वंसहा ॥ ५३ ॥ (२५)

---

47 [b]) N न च सरस° (hypermetric). 48 [b]) B स्वात्मना वर्जितेभ्यः. 49 [a]) N प्रशान्तं (for °न्ते). — [b]) B निर्विशङ्कं. — [c]) N अन्वेष्यं (for अन्विष्यंस्त्). B उन्मूलयैतत्. — [d]) B °वृक्षे. B मथितगुरु° (for प्रथिततम°). 51 [a]) B पुण्याः (for एव). — [c]) B °दहा (for °सहा). 52 [b]) B स्रक्चन्दनादौ (for यस्य स्रगादौ). — [c]) B सा चैषा (for तस्यैषा). N तदान्वेषणं. 53 [a]) B स्वान्तव्योम्नि.

विश्वेश्वरे भवति विश्वजनीनजन्मविश्वंभरे भगवति प्रथितप्रभावे ।
यो दत्तचित्तविषयः सुकृती कृतार्थो यत्र क्वचित् प्रतिदिनं निवसन् गृहादौ ॥ ५४ ॥
छिद्रत्वमत्र पतितं वपुरन्धकूपे पुंसो प्रमादनुपमं सहनीयतेजः ।
उद्धृत्य यो जगति तद् भविता कृतार्थो मन्ये स एव समुपासितविश्वनाथः ॥ ५५ ॥

यद्येता मदनेषवो मृगदृशश्च चेतःकुरङ्गारयो
 धीराणामपि नो भवेयुरबलाः संसारमायापुरे ।
को नामामृतसागरे न रमते धीरः सदा निर्मले
 पूर्णानन्दमहोर्मिरम्यनिकरे रागादिनक्रोज्झिते ॥ ५६ ॥ (४१)

बालेयं बालभावं त्यजति न सुदती यत्कटाक्षैर्विशालैर्
 अस्मान्विभ्रामयन्ती लसदधरदलाक्षिप्तचूतप्रवाला ।
नेतुं वाञ्छत्यकामान् स्वसदनमधुना क्रीडितुं दत्तचित्तान्
 पुष्पश्रीलोत्पलाभे मुरजिति कमलावल्लभे गोपलीले ॥ ५७ ॥ (४२)

शिव शिव महाभ्रान्तिस्थानं सतां विदुषामपि
 प्रकृतिचपला धात्रा सृष्टाः स्त्रियो हरिणीदृशः ।
विजहति धनं प्राणैः साकं यतस् तदवाप्तये
 जगति मनुजा रागाकृष्टास् तदेकपरायणाः ॥ ५८ ॥ (३८)

हरति वपुषः कान्तिं पुंसः करोति बलक्षतिं
 जनयति भृशं भ्रान्तिं नारी सुखाय निषेविता ।
विरतिविरसा भुक्ता यस्मात् ततो न विवेकिभिर्
 विषयविरसैः सेव्या मायासमाश्रितविग्रहा ॥ ५९ ॥ (३९)

कमलवदना पीनोत्तुङ्गं घटाकृति बिभ्रती
 स्तनयुगमियं तन्वी श्यामा विशालदृगञ्चला ।
विशददशना मध्यक्षामा श्रुथेति जनाः श्रमं
 विदधति मुधा रागादुच्चैरनीदृशवर्णने ॥ ६० ॥ (४०)

जनयति सुतं कंचिन् नारी सती कुलभूषणं
 निरुपमगुणैः पुण्यात्मानं जगत्परिपालकम् ।
कथमपि न सा निन्द्या वन्ध्या भवेन् महतां यतः
 सुरसरिदिव ख्याता लोके पवित्रितभूतला ॥ ६१ ॥ (४३)

---

54 [a]) B विश्वेश्वरो. B जनीनजन्मा. 55 [b]) B महनीयतेजः. — [c]) B सद्यः समुद्धरति (for उद्धृत्य यो जगति). 56 [c]) N तदा (for सदा). 57 [b]) B °वक्रक्षिप्त°. 59 [a]) N बलक्षितिं. — [d]) B °विमुखैः (for °विरसैः). 60 [c]) B मध्ये क्षामा. B nos. 54 = 18, 55 = 24. 61 [b]) B °पालनं (for °पालकम्).

धन्या एते पुमांसो यदयमहमिति त्यक्तचेतोविकल्पा
निःशङ्कं संचरन्तो विदधति मलिनं कर्म कामप्रयुक्ताः[a]।
जानन्तोऽप्यर्थहीनं जगदिदमखिलं भ्रान्तवद् द्वैतजालं
रागद्वेषादिमन्तो वयमयमिति हा न त्यजन्तेऽभिमानम् ॥६२॥ (१५)

प्रज्ञावन्तोऽपि केचिच् चिरमुपनिषदाद्यर्थकारा यतन्तो
व्याकुर्वन्तोऽपि केचिद् दलितपरमता यद्यपि ज्ञाततत्त्वाः।
तीर्थे तीर्थे तथापि भ्रमणरसिकतां नो जहत्यध्वखेदा
यत् तत् कष्टं विधत्ते मम मनसि सदा पश्यतस् तत्र कृत्यम् ॥६३॥ (५)

तीर्थावस्थानजन्यं न भवति सुकृतं दुष्कृतोन्मूलनं वा
यस्मादाभ्यां विहीनः श्रुतिसमधिगतः प्रत्यगात्मा जनानाम्।
सर्वेषामद्वितीयो निरतिशयसुखं यद्यपि स्वप्रकाशस्
तीर्थे विद्यास् तथापि स्पृहयति तपसे यत् तदाश्चर्यहेतुः ॥६४॥ (४)

उदासीनो देवो मदनमथनः सज्जनकुले
कलिक्रीडासक्तः कृतपरिजनः प्राकृतजनः।
इयं म्लेच्छाक्रान्ता त्रिदशतटिनी चोभयतटे
कथं भ्रातः स्थाता कथय सुकृतिन् कुत्र विभयः ॥६५ (७९)

निःसारा वसुधाधुना समजनि प्रौढप्रतापानल-
ज्वालाजालसमाकुला द्विपघटासंघट्टविक्षोभिता।
म्लेच्छानां रथवाजिपत्तिनिवहैरुन्मूलिता कीदृशी-
यं विद्या भवितेति हन्त न सखे जानीमहे मोहिताः ॥६६॥ (८०)

वेदो निर्वेदमागादिह नमनभिया ब्राह्मणानां वियोगाद्
वैयासिक्यो गिरोऽपि क्वचिदपि विरलाः सांप्रतं सन्ति देशे।
इत्थं धर्मे विलीने यवनकुलपतौ शासति क्षोणिबिम्बं
नित्यं गङ्गावगाहाद् भवति गतिरितः संसृतेरर्थसिद्धौ ॥६७॥ (८१)

गङ्गा गङ्गेति यस्याः श्रुतमपि पठितं केनचिन् नाममात्रं
दूरस्थस्यापि पुंसो दलयति दुरितं प्रौढमित्याहुरेके।
सा गङ्गा कस्य सेव्या न भवति भुवने सज्जनस्यातिभव्या
ब्रह्माण्डं प्लावयन्ती त्रिपुरहरजटामण्डलं मण्डयन्ती ॥६८॥ (८२)

यत्तीरे वसतां सतामपि जलैर्मूलैः फलैर्जीवतां
मुक्ताहंममभावशुद्धमनसामाचारविद्यावताम्।

---

63 [a]) B नो जहात्यध्वखेदाद्. 64 [b]) B °गतप्रत्यगात्मा. — [c]) B °सपसुखी.
65 [d]) N सुकृती (for सुकृतिन्) 68 [d]) N (wrongly) मण्डयन्तीम्.

कैवल्यं करबिल्वतुल्यममलं संपद्यते हेलया
सा गङ्गा बहुलाऽमलोर्मिपटला सद्भिः कुतो नेष्यते ॥ ६९॥(८९)
तीर्थानामवलोकने सुमनसामुत्कण्ठते मानसं
तावद् भूवलये सतां पुररिपुध्यानामृतास्वादिनाम् ।
यावत् ते न विलोकयन्ति सरितां रोचिष्णुमुक्तावलीं
श्रीमन्नाकतरङ्गिणीं हरजटाजूटाटवीविभ्रमाम् ॥ ७० ॥ (९०)
संसारो विविधाधिबाधविधुरः सारायते मानसे
निःसारोऽपि वपुष्मतां कलिवृकग्रासीकृतानां चिरम् ।
दृष्टायां घनसारपाथसि महापुण्येन यस्यां सतां
सा सेव्या न कुतो भवेत् सुरधुनी स्वर्गापवर्गोदया ॥ ७१ ॥ (९१)
यस्याः संगतिरुन्नतिं वितनुते वाराममीषां जनैर्
उद्गीता कविभिर्महेश्वरमनोभीष्टा महीमण्डले ।
सा सन्तः शरदिन्दुसोदरपयःपूराभिरामा नद-
त्कोकश्रेणिमनोज्ञपुण्यपुलिना भागीरथी सेव्यताम् ॥ ७२ ॥ (८४)
क्वचिद्धंसश्रेणी सुखयति रिरंसुः श्रुतिसुखं
नदन्ती चेतो नो विपुलपुलिने मन्थरगतिः ।
तदेतस्या योऽर्थी सुरतरुलता नाकतटिनी
सदा सद्भिः सेव्या सकलपुरुषार्थाय कृतिभिः ॥ ७३ ॥ (९२)
कलौ गङ्गा काश्यां त्रिपुरहरपुर्यां भगवती
प्रशस्ता देवानामपि भवति सेव्यानुदिवसम् ।
इति व्यासो ब्रूते मुनिजनधुरीणो हरिकथा-
सुधापानस्वस्थो गलितभवबन्धोऽतुलमतिः ॥ ७४ (८३)
यावज्जागर्ति चित्ते दुरितकलुषिते प्राणिनो वित्तपुत्र-
क्षेत्राद्यर्थेषु चिन्ता तदतिपरतया भ्राम्यमाणस्य नित्यम् ।
तावन्नार्थस्य सिद्धिर्भवति कथमपि प्रार्थितस्यार्तिभाजा
कैवल्याख्यस्य लोके रमणसुखभुवो मुक्तदोषानुषक्तेः ॥ ७५ ॥ (२७)
सन्त्यर्था मम संचिताश्च च बहुधा पित्रादिभिः सांप्रतं
वाणिज्यैः कृषिभिः कलाभिरपि तान् विस्तारयिष्यामि वः ।
हे पुत्रा इति भावयन्ननुदिनं संसारपाशावलिं
छेत्तायं नु कथं मनोरथमयीं जीवो निरालम्बनः ॥ ७६ ॥ (६०)

---

71 [a]) N °बधिरः (for °विधुरः). — [c]) B इष्टायां (for दृष्टायां). 72 [d]) N °मनोज° (for °मनोज्ञ°). 73 [c]) B हरन्ती पापौघान्सुरतरुवृता नाकतटिनी. 75 [b]) N भ्राम्यमानस्य. 76 [a]) N बहुविधाः (for च बहुधा). — [c]) N °पाशावलीं, — [d]) N तु (for नु).

जानन्नेव करोति कर्म बहुलं दुःखात्मकं प्रेरितः
केनाप्यप्रतिवाच्यशक्तिमहिमा देवेन मुक्तात्मना ।
सर्वज्ञेन हृदिस्थितेन तनुमत्संसाररङ्गाङ्गणे
माद्यद्बुद्धिनटीविनोदनिपुणो नृत्यन्ननङ्गप्रियः ॥ ७७ ॥ (४५)

को देवो भुवनोद्यावनकरो विश्वेश्वरो विद्यते
यस्याज्ञावशवर्तिनो जलधयो नाप्लावयन्ति क्षितिम् ।
इत्याम्नातमपीश्वरं सुरशिरोरत्नं जगत्साक्षिणं
सर्वज्ञं धनयौवनोद्धतमना नो मन्यते बालिशः ॥ ७८ ॥ (९)

कस्येमौ पितरौ मनोभवव्रता तापेन संयोजिता-
वन्योन्यं तनयादिकं जनयतो भूम्यादिभूतात्मभिः ।
इत्थं दुःस्थमतिर्मनोभवरतिर्यो मन्यते नास्तिकः
शान्तिस्तस्य कथं भवेद् धनवतो दुष्कर्मधर्माश्रमात् ॥ ७९ ॥ (१०)

हिक्काकासभगंदरोदरमहामेदज्वरै राकुलः
श्लेष्माद्यैरपि निद्रया विरहितो मन्दानलोऽल्पाशनः ।
तारुण्येऽपि विलोक्यते बहुविधो जीवो दरिद्रेश्वरो
हा कष्टं कथमीदृशं भगवतः संसारदुःसागरे ॥ ८० ॥ (५८)

माद्यत्तार्किकतान्त्रिकद्विपघटासंघट्टपञ्चाननस्
तद्वद्दृप्तकृतान्तवैद्यककलाकल्पोऽपि निष्किंचनः ।
यत्र क्वापि धनाशया कृशतनुर्भूपालसेवापरो
जीवन्नेव मृतायते किमपरं संसारदुःसागरे ॥ ८१ ॥ (५५)

आढ्यः कश्चिदपण्डितोऽपि विदुषां सेव्यः सदा धार्मिको
विश्वेषामुपजारको मृगदृशामानन्दकन्दाकरः ।
कर्पूरद्युतिकीर्तिभूषितहरिद्भूमण्डले गीयते
शश्वद्बन्दिजनैर्महीतनुभृतः पुण्यैर्न कस्योदयः ॥ ८२ ॥ (७)

कर्तव्यं न करोति बन्धुभिरपि स्नेहात्मभिर्बोधितः
कामित्वादवमन्यते हितमतं धीरोऽप्यमीष्टं नरः ।
निष्कामस्य न विक्रिया तनुभृतो लोके क्वचिद् दृश्यते
यत्तस्मादिदमेव मूलमखिलानर्थस्य निर्धारितम् ॥ ८३ ॥ (४६)

---

77 [b]) Nt °महिना (for °महिमा). — [c]) B मनुजः (for तनुमत्-). 78 [a]) N जलधियो (wrongly). 79 [d]) B °धर्माश्रयात्. 81 [b]) N °कदन्त° (for °कृतान्त°). — [c]) N विनाशया (for धना°). 82 [a]) B धार्मिका. — [b]) B °कारको (for °जारको). 83 [b]) N अभिमन्यते. B निजहितं (for हितमतं). — [d]) N °दयमेव (for °दिदमेव).

निष्कामा मुनयः परावरदृशो निर्धूतपापोदया
निःसङ्गा निरहंकृता निरुपमानन्दं परं लेभिरे ।
यद्गत्वा न लुठन्ति मातृजठरे दुःखाकरे मानवा
दुर्गन्धे पुनरेत्य काममकरे संसारपाथोनिधौ ॥ ८४ ॥ (२८)

कामस्यापि निदानमाहुरपरे मायां महाशासनां
निश्चित्कां सकलप्रपञ्चरचनाचातुर्यलीलावतीम् ।
यत्सङ्गाद् भगवानपि प्रभवति प्रत्यग्महामोहहा
श्रीरङ्गो भुवनोदयावनलयव्यापारचक्रेऽक्रियः ॥ ८५ ॥ (२१)

तुल्यार्थेन त्वमैक्यं त्रिभुवनजनकम् तत्पदार्थः प्रपद्य
प्रत्यक्षं मोहजन्म त्यजति भगवति त्वंपदार्थोऽपि जीवः ।
श्रुत्वाचार्यप्रसादान् निरुपमविलसद्ब्रह्मविद्यस्तदैक्यं
प्राप्यानन्दप्रतिष्ठो भवति विगलितानाद्यविद्योपरीहः ॥ ८६ ॥ (३२)

संन्यासो विहितस्य केशवपदद्वन्द्वे व्यधायि श्रुता
वेदान्ता निरवद्यनिष्कलपरानन्दाः सुनिष्ठाश्चिरम् ।
संसारे वधबन्धदुःखबहुले मायाविलासेऽव्ययं
ब्रह्मास्मीति विहाय नान्यदधुना कर्तव्यमास्ते क्वचित् ॥ ८७ ॥ (३५)

हित्वा विश्वाद्यवस्थाः प्रकृतिविलसिता जाग्रदाद्यैर्विशेषैः
सार्धं चैतन्यधातौ प्रकृतिमपि समं कार्यजातैरशेषैः ।
ज्ञानानन्दं तुरीयं विगलितगुणकं देशकालाद्यतीतं
स्वात्मानं वीतनिद्रः सततमधिकृतश्चिन्तयेदद्वितीयम् ॥ ८८ ॥ (३४)

* * * * * *

अग्रे पश्चादधस्तादुपरि च परितो दिक्षु चान्यास्वनादिः
कूटस्था संविदेका सकलतनुभृतामन्तरात्मानियन्त्री ।
यस्यानन्दस्वभावा स्फुरति शुभधियः प्रत्यहं निष्प्रपञ्चा
जीवन्मुक्तः स लोके जयति गतमहामोहविश्वप्रपञ्चः ॥ ९० ॥ (३६)

काहं ब्रह्मेति विद्या निरतिशयसुखं दर्शयन्ती विशुद्धं
कूटस्थं स्वप्रकाशं प्रकृतिसुचरिता खण्डयन्ती च मायाम् ।
काविद्याहं ममेति स्थगितपरसुखा चित्तभित्तौ लिखन्ती
सर्वानर्थाननर्थान् विषयगिरिभुवा वासनागैरिकेण ॥ ९१ ॥ (२६)

---

85 [a]) N महाशासना(:). — [d]) N °चक्रे क्रियाः. 86 [d]) B °नाद्यविद्यो निरीहः. Laouna in N for 89. 90 [a]) N धान्या° (for चान्या°)?. 91 [a]) B काहं. — [b]) B कूटस्थ- (for कूटस्थं). — [d]) B °गिरिभवा.

अहं ब्रह्मास्मीति स्फुरदमलबोधो यदि भवेत्
 पुमान्पुण्योद्रेकादुपचितपरानर्थविरतिः ।
तदानीं क्वाविद्या भृशमसहमानौपनिषदं
 विचारं संसारः क्व च विविधदुःखैकवसतिः ॥ ९२ ॥ (३३)

कश्चित् क्रन्दति कालकर्कशकराकृष्टं विनष्टं हठाद्
 उत्कृष्टं तनयं विलोक्य पुरतः पुत्रेति हा हा क्वचित् ।
कश्चिन् नर्तकनर्तकीपरिवृतो नृत्यत्यहो कुत्रचिच्
 चित्रं संसृतिपद्धतिः प्रथयति प्रीतिं च कष्टं च नः ॥ ९३ ॥ (६८)

नान्नं जीर्यति किंचिदौषधबलं नालं स्वकार्योदये
 शक्तिश्च चङ्क्रमणे न हन्त जरया जीर्णीकृतायां तनौ ।
अस्माकं त्वधुना न लोचनबलं पुत्रेति चिन्ताकुलो
 ग्लायत्यर्थपरायणोऽतिकृपणो मिथ्याभिमानो गृही ॥ ९४ ॥ (५०)

अन्नाशाय सदा रटन्ति पृथुकाः क्षुत्क्षामकण्ठाः स्त्रियो
 वासोभी रहिता बहिर्व्यवहृतौ निर्यान्ति नो लज्जया ।
गेहादङ्गणमार्जनेऽपि गृहिणो यस्येति दुर्जीवितं
 यद्यप्यस्ति तथापि तस्य विरतिर्नोदेति चित्रं गृहे ॥ ९५ ॥ (५७)

सद्वंशो गुणवानहं सुचरितः श्लाघां करोत्यात्मनो
 नीचानां विदधाति च प्रतिदिनं सेवां जनानां द्विजः ।
योषित् तस्य जिघृक्षया स च कुतो नो लज्जते सज्जनाल्
 लोभान्धस्य नरस्य नो खलु सतां दृष्टं हि लज्जाभयम् ॥ ९६ ॥ (४९)

कामादित्रिकमेव मूलमखिलक्लेशस्य मायोद्भवं
 मर्त्यानामिति देवमौलिविलसद्भ्राजिष्णुचूडामणिः ।
श्रीकृष्णो भगवानवोचदखिलप्राणिप्रियो मत्प्रभुर्
 यस्मात् तत्त्रिकमुद्यतेन मनसा हेयं पुमर्थार्थिना ॥ ९७ ॥ (२०)

यत्प्रीत्यर्थमनेकधामनि मया कष्टेन वस्तु प्रियं
 स्वस्याशाकवलीकृतेन विकलीभावं दधानेन मे ।
तत्सर्वं विलयं निनाय भगवान् यो लीलया निर्जरो
 मां हित्वा जरयाकुलीकृततनुं कालाय तस्मै नमः ॥ ९८ ॥ (६५)

---

92 [cd]) क्व च तव ममेत्यल्पविषयोऽभिमानः (for भृशम°—°चारं). 94 [d]) B °भिमानी. 96 [c]) B यो वित्तस्य (for योषित्तस्य). 98 [a]) B °धाकमि (for °धामनि).

आयुर्वेदविदां रसाशनवतां पथ्याशिनां यत्नतो
वैद्यानामपि रोगजन्म वपुषो ह्यन्तर्यतो दृश्यते ।
दुश्चक्षुःकवलीकृतत्रिभुवनो लीलाविहारस्थितः
सर्वोपायविनाशनैकचतुरः कालाय तस्मै नमः ॥ ९९ ॥ (६६)

ते धन्या भुवने सुशिक्षितपरब्रह्मात्मविद्या जना
लोकानामनुरञ्जका हरिकथापीयूषपानप्रियाः ।
येषां नाकतरङ्गिणीतटशिलाबद्धासनानां सतां
प्राणा यान्ति लयं सुखेन मनसा श्रीरङ्गचिन्ताभृताम् ॥ १०० ॥ (३७)

हे पुत्रा व्रजताभयं यत इतो गेहं जनन्या समं
रागद्वेषमदादयो भवतु वः पन्थाः शिवोऽमायया ।
काशीं सांप्रतमागतोऽहमह ह क्लेशेन हातुं वपुः
सर्वानर्थगृहं सुपर्वतटिनीवीचिश्रिया मण्डितम् ॥ १०१ ॥ (३)

यत्साक्षादभिधातुमक्षमतया शब्दाद्यनालिङ्गितं
कूटस्थं प्रतिपादयन्ति विलयद्वारा प्रपञ्चस्रजः ।
मोक्षाय श्रुतयो निरस्तविधयो ध्यानस्य चोच्छित्तये
तत्राद्वैतवने सदा विचरताच् चेतःकुरंगः सताम् ॥ १०२ ॥ (३१)

बुधानां वैराग्यं सुघटयतु वैराग्यशतकं
गृहस्थानामेकं हरिपदसरोजप्रणयिनाम् ।
जनानामानन्दं वितरतु नितान्तं सुविशद-
त्रयं शेषव्याख्यागलिततमसां शुद्धमनसाम् ॥ १०३ ॥

॥ इति श्रीभर्तृहरिविरचितं विज्ञानशतकं चतुर्थम् ॥

---

99 °) N दुश्चक्षोत्कवली°. 102 °) B [ऽ]ज्ञानस्य (for ध्यानस्य). 103 Omitted in B

Alphabetical Index of Ślokas

Parentheses enclose a beginning found only in the critical apparatus

Addenda And Corrigenda.

Special attention is again called to supplementary information about MSS in the Introduction; also to extra variants and corrections under versions Q, H, T_1.

Sanskrit Text: Read on p. 10, 22^c किमपरैः for किमपरैः; p. 65, 166^d सुतराम् for सुतराम्; 167^b हृदय for ह्रदय; p. 67, 171^b यत्राप्येकस् for यत्राप्येकस; p. 97, 247^a सार्धमन्येन for सार्धमन्यने; p. 112, 286^e जृम्भते for जम्भते; p. 120, 305^d °चित्तः for °चित्तः; p. 149, number of 432 misprinted 433; p. 150, 441 should be combined with p. 153, 461; p. 153, 466^a read °कर्कशकर- for °कर्कशर-; p. 160, 510 is found in an anonymous fragment of a printed anthology as तरुणि संहर संहर लोचने तृणलवेषु कुठारपरिग्रहः। मयि मनोभवमार्गणपीडिते न हि सतामुचितं मृतमारणम् ॥ p. 167, 556–557 are in inverted alphabetical order; p. 185, 689^b read धन्यास् for धन्यांस; p. 186, 700 is more correctly reported in one of the unnumbered Ham MSS as N1 = योगेन्द्रेण फलं प्रदत्तमजरामृत्याय यस्मै पुनः राज्ञ्यै भर्तृहरेण दत्तमनया वंठाय तस्मै ददे। वंठेनादित हीनपुण्ययुवतौ विप्राय वारस्त्रिया विप्रेणापि तदेव दैववशतो राज्ञे प्रदत्तं पुनः ॥ p. 187, 705–706 in inverted alphabetical order; 710^c emend वनेषु to नवेषु; p. 190, 730 is the unemended form of p. 191, 735, printed inadvertently; p. 193, 754^{cd} might be खण्डिता एव शोभन्ते वीराधरपयोधराः ॥ cf. SRB. p. 328. 3; p. 205, 852^a read घृतं for घृतं; p. 225, 101^d read मण्डिताम् for मण्डितम् [to qualify काशीं].

Critical Apparatus: Y means Y T G M on p. 2, 4 and p. 3, 6; p. 4, 7^d variants झटति etc. should be read झटति etc.; p. 44, 112 Harilal's lith. ed. is dated 1860; p. 59, 149^d MS C reads संप्राप्तोपि वराटकोहि; p. 79, 197^a version A, not B, reads कांस्युज्वलं; p, 117, 298 seems to have been constructed from two consecutive stanzas as for example in the *Pañcatantra*, ed. Bomb. I. 188–189 by adding *ab* of the second to *cd* of the first.

The critical apparatus does not cite Q numbers, which will be found in the synoptic chart. MS C contains stanza 501, but not the alternative form 739, as N46. The following numbers of group III ślokas in codex I have not been cited in the critical apparatus: 378 = N105(106); 528 = N101(102); 596 = N106(107), beginning अनुगन्तव्याः; 599 = V65(71); 642 = N107(108); 648 = N28; 726 = Ś94(105); 772 = Ś93(98).

A MS in the newly acquired Gokhale collection at the BORI is complete but for the first 3–1/2 stanzas, and seems to to be derived from the same parent version as Ham 874, which is shorter. The omissions common to these are 278, 282, 283, 342; common inclusions 291, 520, 544, 599 804 816. The following additional stanzas from the BORI MS should be taken into group III, as numbers 853–6: N 5 = अयश्रवणकचर्वणं फणिफणामणेः कर्षणं करेण गिरितोलनं जलनिधेः पदालंघनम्। प्रसुप्तहरिबोधनं निशितखड्गसंस्पर्शनं भवेदिह न तु क्वचित् कृपणतो धनस्पर्शनम् ॥ ८५३ ॥–SRB. p, 72. 58. Ś 91 = प्रियतः प्रभावपदमन्तोऽपि हृदयमान् भवति। न यावच् चन्दनतरुसुरभिनिर्मलमलयपवमानः ॥ ८५४ ॥ (followed by 274). V 3 = मनः कुत्रोद्योगः सपदि वद मे गम्यपदवीं नरे वा नार्यां वा गमनमुभयत्रापि च मृषा। यतस् ते क्लीबत्वं प्रतिपदमहो हास्यपदवीं जनस्तोके मागास्त्वमनुसरहि ब्रह्म परमम् ॥ ८५३ ॥ V 2 = शान्तेर्मातुर्विवेकात् पितुरपि कृपणा मंक्षु कृत्वा पृथक्कामाशा योषा स्वतन्त्रा व्रजति परगृहान्सर्वदा वीतलज्जा। पुष्ट्वा दम्भं स्वबन्धुं मम यमनियमौ भ्रातरौ भर्त्सयन्तीं स्त्रियामेनां कुभार्यां तदपि कथमहं हन्त वन्ध्यां श्रयामि ॥ ८५६ ॥. —SRB. p. 77. 56.

From a recently acquired MS. at the BVB, N104 — कोऽर्थान्प्राप्य न गर्वितो विषयिणः कस्यापदोऽस्तं गताः स्त्रीभिः कस्य न खण्डितं भुवि मनः को नाम राज्ञां प्रियः। कः कालस्य न गोचरान्तरगतः [कोऽर्थी गतो गौरवं को वा दुर्जनवागुरासु पतितः] क्षेमेण यातः पुमान् ॥ ८५७ ॥ —BIS. 1942 (754). Pañc. ed. Koseg. I. 162. ed. orn. 115. ed. Bomb. 146. Hit. ed. Schl. II. 144. ed. Johns. 151. Suk. Pet. MS. 22. Vikramacs. 40. Ṣadratna 2 (Haeb. p. 4). Vṛddha Cāṇ. 16. 4. Subhāsh. 69; Śp. 1534; SBH. 3470 (Pañc.); SDK. 5. 36. 2 (p. 302); SRB. p. 178. 1011 (Pañc.). Copied Saṃvat 1667 at Burhānpūr by Sāha Nemīdāsa's son, resident of Sārangpūr; complete, with an old Gujarāti translation differing from that of version B; N parallels Uda 1486 as also the middle half of Ś while V follows the long-vairāgya group. The scribe's carelessness, with the likelihood of this being a misch-codex, reduces the importance of omissions, among which are 43, 112, 143, 174*, 216, 231, 280, 297. Stanza 75, omitted in Uda 1486 is included though the two are concordant for this portion of the text. Other inclusions are 367, 412, 436, 440, 683 [गर्वित], 550, 250, 528, 542, 262, 560, 582, 596, 599, 609, 264, 266, 272, 288, 295, 636, 724, 736, 739, 741, 337, 339, 344. MSS. no. 47–15 and 47–16 of the N. R. Mate collection at Sātārā are the W version N and V respectively, adding nothing except to the total number of codices examined which is now 381.

Introduction p. 23, l. 20, read Jodhpur for Jaipur.

भो भो पुस्तकवाचका बुधवरा युष्मानहं प्रार्थये
यद्धस्तत्वरया प्रमादजनितं बिन्द्वक्षरभ्रंशनम् ।
तद्दृष्ट्वा न शपेत मन्युवशगास्त्वत्पादपङ्केरुह-
द्वन्द्वे मे प्रणतस्य मस्तकमिदं भृङ्गायते क्षम्यताम् ॥

(From the Colophon to SSD. skandha V).